अथ

श्री। रुद्रस्य हवनपध्दतिः।

(प्रयोगः)

॥श्रीगणेशाय नमः॥ शिवास्तनुमुद्यद्विवस्वत्प्रभाभं वराभीतिहस्तं सृणिं मोदकं तं॥ दधं तं गजा
स्यं सुसिन्दूरकुंभं सुधाधाम खंडावतंसं भजेहं॥१॥ अथ रुद्रस्याहवनपद्धतिर्लिख्यते॥ आ
चार्यः मंडपार्थं भूमिपरीक्षापूर्वकं यजमानोचितभूमिपरिग्रहं कृत्वा शल्यनिरासपूर्वकं
पूर्वं भूम्यपेक्षया हस्तप्रमाणोच्छ्रितां मही हस्तोच्छ्रितां वा समां भूमिं कृत्वा तदुक्तप्रकारेण मंडप
कुंडादि कुर्यात्॥ तत्र पूर्वं चिकीर्षितमंडपकुंडादीनां निर्विघ्नसिद्ध्यर्थं गणेशपूजनं कुर्यात्॥
ततो देशकालकीर्तनानंतरं मंडपकुंडादिकर्तुं भूमिकूर्मानंतपूजनमहं करिष्ये॥ इति संकल्प्य
भूम्यादिपूजनं कुर्यात्॥ तद्यथा॥ गंधादिपूजोपकरणानां स्वसमीपे स्थापनं॥ कूर्मपृष्ठोप
रि स्थितां भुजंगवर्णचतुर्भुजां पद्मशंखचक्रभूतलधरां प्रसन्नाननां भूमिं ध्यात्वा आगच्छ सर्वक
ल्याणि वसुधे लोकधारिणि॥ पृथिवि ब्रह्मदत्तासि काश्यपेनाभिनंदिते इति मंत्रेण भूमिमावाह्य॥ ॐ
भूम्यै नमः सफलां पुष्पांजलिं दत्वा॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना दंष्ट्राग्रे लीलया देवि य
ज्ञार्थं प्रणमाम्यहमिति दण्डवत्प्रणम्य दधिदुग्धयवदूर्वागंधसिद्धार्थजातीरूप्यइत्यष्टांगार्घ्यं गृ
हीत्वा जानुभ्यामवनिं गत्वा॥ ब्रह्मणा निर्मिते देवि विष्णुना शंकरेण च॥ पार्वत्या चैव गायत्र्या स्क
न्दवैश्रवणेन च॥ यमेन पूजिते देवि धर्मस्य विजिगीषया॥ सौभाग्यं देवि पुत्रांश्च धनं रूपं च प्र
जिता॥ गृहाणार्घ्यमिमं देवि सौभाग्यं च प्रयच्छ मे॥ एतावता मंत्रेणार्घ्यं दत्वा ॐ भूम्यै नमः इत्य
नेन भूरसीत्यनेन वा गंधादिपंचोपचारैः पूजनं॥ उपचारानिमान् तुभ्यं ददामि परमेश्वरि॥

२ लकोष्टकोणेषु स्तंभपंचमांशप्रमाणेन वटानुखात्वा॥ बहिराग्नेयावटक्रमेण सर्वेष्ववटेषु स्तंभ
रोपणं कुर्यात्॥ तत्र प्रथमं आग्नेयावटे दूर्वायवसिद्धार्थकान् प्रक्षिप्य॥ उछ्रयस्व वनस्पतेऽनेन
स्तंभोपर्याछाघ ऊर्ध्व ऊषुण इत्यनेन मंत्रेण वटे रोपयेत्॥ ततोऽवटं दृढं पांसुभिः पूरयित्वा
शिष्टाचारात्स्तंभे पोटलीं बध्वा गंधपुष्पमालादिभिरलंकृत्य यतोयतः समीहस इति प्रार्थयेत्
ततः प्रदक्षिणक्रमेण बाह्यावटेषु सर्वस्तंभरोपणं॥ ततो मंडपमध्यकोष्टचतुष्टयस्थितस्तं
भचूडासु उभयाग्रे संधियुक्तबलिकाख्यकाष्टचतुष्टयदानं॥ बाह्यस्तंभेष्वपि कर्णे संपादनेन कोण ५
चूडासंपादनेन वा प्रतिदिशं काष्टचयस्थापनं॥ विदिक्कोणस्तंभबाह्यकोणस्तंभयोरेकैकमिति
कोणचतुष्टये काष्टचतुष्टयस्थापनं॥ तदनंतरं यथा उपर्याछादनं कर्तुं शक्यते तथा प्रतिदि
शं अन्यानि काष्टानि वंशान्वा स्थापयित्वा मध्यस्तंभचतुष्टयोपरि शिखराकारसंपादनम्॥
ततः प्रागादिक्रमेण चतुर्दिक्षु द्वारचतुष्टयकरणं तत्र प्रतिदिशं ऊर्ध्वकाष्टद्वयस्य पंचहस्तप
रिमितस्य पंचमांसेन निखननं॥ तदुपरि अधममंडपे प्रांतद्वयछिद्रयुक्तहस्तद्वयपरिमि
ततिर्यक्काष्टदानं मध्यमे चतुरंगुलाधिकं॥ उत्तमेऽष्टांगुलाधिकं॥ ततो द्वारवर्जं सर्वस्या
पि मंडपस्य उपर्यधश्च नारिकेलादिदलकैर्वा शोभनैरन्यैः पल्लवैर्वा वेणुभिर्वा कटैर्वा
छादयेत्॥ ततो मध्यस्थितस्तंभचतुष्टयमध्ये दुष्टकाभिर्मृदा वा पीठदेवतापूजनार्थं म
ध्यकोष्टपरिमितसमचतुरस्रवेदिकासंपादनं तदुच्चत्वं च हस्तप्रमाणं॥ वेदीस्तत्तृतीयांश २

मध्येकुंडं

चतुर्थांश पंचमांश सप्तमांश नवमांशैकादशांशामेना मन्यतमेनांशेन वोच्चा॥ कुंडस्य प्रा
च्यां पीठपूजनार्थं हस्तादिपरिमितवेदिकासंपादनमिति केचित्॥ नैरृत्ये वास्तुमंडल
पूजार्थं आग्नेय्यां सर्वतोभद्रपूजार्थं वायव्ये योगिमंडलार्थं च वेदीकरणमित्यपि केचित्॥
ततः प्रागादिद्वारेभ्यो बहिर्हस्तपरिमिते देशे वेदीचतुर्थांशपरिमिते वा प्लक्षोदुंबराश्व
त्थवटवृक्षोद्भवाः तोरणचतुष्टयालाभे एतेषां मध्ये एकवृक्षोद्भवा वा शमीवृक्षोद्भवा वा॥
तदभावे जंबूखदिरतालवृक्षान्यतमजा वा अधमादिषु क्रमेण पंचषट्सप्तहस्तोछ्रा
याश्छिद्ररहिताः सरलाः समप्रमाणा आर्द्राश्चूडान्विताः त्वक्सहिताः॥ प्रतिदिशं युगुल
युगलं स्वस्वपंचमांशेन निखेयाः तासु चूडासु क्रमेण हस्तद्वय सपादहस्तद्वय सार्धहस्त
द्वयपरिमितानि दैर्घ्यार्द्धपरिमितानि वा उभयाग्रछिद्रयुक्तानि शाखावृक्षोद्भवान्य
वतिर्यक्काष्टानि बिलनिवेशनेन स्थापनीयानि॥ ततस्तिर्यक्काष्टोपरि प्रतिदिशं त्री
णि त्रीणि त्रिशूलानि एकैकं वा त्रिशूलं बिलनिवेशनेन स्थापनीयम्॥ तत्राधमे नवांगुलं
दैर्घ्यं मध्यमे एकादशांगुलं उत्तमे त्रयोदशांगुलं॥ त्रिष्वपि स्वस्वदैर्घ्यचतुर्थांशेन
विस्तारः॥ द्व्यंगुलं त्र्यंगुलं चतुरंगुलं च क्रमेण बिलनिवेशनम्॥ शूलस्य मध्यमशृंगं

३ अनुक्तकर्त्तव्यं पार्श्वद्वयगतं तु किंचिद्वक्रं॥ ततः सदलसफलेनारिकेलक्रमुकदलपल्लवान्वितमस्तंभेदं
र्पते विचित्रवस्त्रबंधैश्चामरैर्घंटिकाभिर्भांडोच्छ्रायैश्च सकलस्तंभमूलं कुर्यात्॥ वितानचामर
पट्टफलपुष्पमालादर्पणघंटिकाखवाद्यस्य नानाविधफलपल्लवैश्च मंडपस्यालंकरणं॥ गुच्छा
लंकरणं संभवे पुष्पमालापल्लवैर्वा मंडपालंकारोऽवश्यं संपादनीयः॥ अनुक्तसाधनैर्युक्त
इत्यादिनादोषश्रवणात्॥ अथ ध्वजस्थापनं॥ ध्वजान् द्विहस्तायतान् पंचहस्त[illegible]र्घान्
दशहस्तमितवंशोपरिस्थापितान् पूर्वादितः पीतारुणकृष्णनीलश्वेतासितश्वेतसितान्
गैरिकादिधातुलिखितमातंगवस्तमहिषसिंहमत्स्यवाजिवृषभांकितान् स्थापयेत्॥
शेषं मांशेऽस्मान्निखेयः॥ पताकाश्च पूर्वादितः प्रतिदिशं एकहस्तायताः सप्तहस्तदीर्घाः
दशहस्तमितवेणुवंदुस्थाः पूर्वोक्तवर्णरंजिताः गैरिकादिलिखितवज्रशक्तिदंडखड्गपाशां
कुशगदात्रिशूलैर्युताः स्थापनीयाः॥ शीर्षं च त्रिहस्तविस्तृतं प्रांतेवर्तमानकिंकिणीकं सचा दशहस्तदीर्घं
[illegible] मरं दशहस्तमितवंशस्थं विन्यसेत्॥ नवमीं पताकां श्वेतां पूर्वेशानयोर्मध्ये स्थापयेत्॥ ता
दृशीमेवाचार्यः कुंडे विन्यसेत्॥ ॥एवं मंडपं संपाद्य॥ ॥तन्मध्ये पूर्वपश्चिमोत्तरे
शानीनामन्यतमदिशि होमानुसारेण कुंडमेखलायोनिनाभिखातयुक्तं मनोरमं कुंडं कु
र्यात्॥ यदा पूर्वग्रहहोमो न कृतस्तदा तदर्थमपि दूरशान्या हस्तमात्रं चतुरंगुलविस्तृतोच्च ३
कमेकपलीयुक्तं साग्निकुंडं कर्तव्यम्॥ तस्मिन् चिंतामणिकारमते मेखलात्रयम्॥ तत्र प्र

भक्त्या गृहाण देवेशि त्वामहं शरणं गतः इति इति निवेदनं॥ ततो गंधपुष्पपायसलाजासक्तु
मिश्रं पसहितैः ॐ सपरिवारायै भूम्यै बलिं समर्पयामीति मही बलिदानं ततः नंदे नंद
यवासिष्टे वसुभिः प्रजया सह॥ जये भार्गवदायादे प्रजानां जयमावह॥ पूर्णे गिरिशदा
यादे पूर्णकामं कुरुष्व मे॥ भद्रे काश्यपदायादे कुरु भद्रां मतिं मम॥ सर्वबीजसमायुक्ते
सर्वरत्नौषधीवृते॥ रुचिरे नंदिनी नंदे वासिष्टे रम्यतामिह॥ प्रजापतिसुते देवि चतुर
महीयसि॥ सुभगे सुव्रते देवि गृहे काश्यपि रम्यतां॥ पूजिते परमाचार्यैर्गंधमाल्यैरलं
कृते॥ भवभूतिकरी देवि गृहे भार्गवि रम्यताम्॥ अव्यक्ते चाकृते पूर्णे शुभे चांगिरसः सु
ते॥ इष्टे त्वं प्रयच्छेष्टं त्वां प्रतिष्ठापयाम्यहं॥ देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे॥
मनुष्यधनहस्त्यश्वपशुबुद्धिकरी भवेति प्रार्थनं॥ ततः ॐ कूर्मायनमः इत्यनेन यस्य कू
र्म इत्यनेन वा गंधादिपंचोपचारैः पूजनं॥ ततः ॐ अनंताय नमः इत्यनेन स्योनापृथिवी त्य
नेन वाऽनंतपूजनं॥ पृथिवीकूर्मानंतपूजने न्यूनातिरिक्तो यो विधिः स सर्वः संपूर्णोऽस्तु
इति संपूर्णताप्रार्थनं॥ आवाहनं न जानामीति विसर्जनं॥ यस्य स्मृत्या०॥ इति भूम्यादि
पूजनं॥ ततः आचार्यः प्राचीसाधनपूर्वकं स्वाभिमतमंडपप्रमाणं चतुरस्रं सूत्रं दत्त्वा प्रा
गपरदक्षिणोत्तरसूत्रचतुष्टयदानेन मंडपभूमिं नवकोष्ठां कृत्वाऽग्नेयकोणमारभ्य सक

४ ममप्रजांगरक्षणं इत्यावाह्य ॥ एतस्यां गणपतये नमः ॥ अथ मध्ये गणपतये नमः ॥ इत्यादिक
मेण संपूज्य ॥ गौर्यादिपूजां कुर्यात् ॥ ततः पुण्याहवाचनं ॥ कलशस्थापनं ॥ गंगेच ० सर्वे समु
द्राः सरितस्तीर्थानि जलदा नदाः ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ श्वेतारूढा सरोजा
क्षी पद्महस्ता शशिप्रभा ॥ आगच्छतु सरिच्छ्रेष्ठा गंगा पापप्रणाशिनी ॥ नीलोत्पलदलश्यामा
पद्महस्ता चतुर्भुजा ॥ आयातु यमुना देवी कूर्मवाहनगा सदा ॥ प्राची सरस्वती पुण्या तथा मं
दाकिनी परा ॥ एता नद्यश्च तीर्थानि गृह्यते आप सर्वशः ॥ तानि सर्वाणि कुंभेस्मिन् विशंतु ब्र
ह्मशासनात् ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृ
गणाः स्मृताः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथ
र्वणः ॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ अत्र गायत्री सावित्री शांतिपुष्टिकरी
तथा ॥ आयांतु देवपूजार्थं दुरितक्षयकारकाः ॥ ततः प्रार्थना ॥ देवदानवसंवादे मथ्यमाने
महोदधौ ॥ उत्पन्नोसि यदा कुंभ विधृतो विष्णुना स्वयं ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि
स्थिताः ॥ त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्र
जापतिः ॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठंति सर्वेपि यतः कामफ
लप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ४

अवनीकृतजानुमंडलः कमलमुकुलसदृशमंजलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्ण
कलशं धारयित्वा ॥ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च तेनायुःप्रमाणेन पुण्यं पुण्याहं ॥
दीर्घमायुरस्तु ॥ ततः चतुर्ब्राह्मणहस्ते पुजलदानं ॥ शिवा आपः संतु सौमनस्यमस्तु अक्षतं चा
रिष्टं चास्तु गंधाः पांतु सौमंगल्यं चास्तु अक्षताः पांतु अक्षताः पांतु आयुष्यमस्तु ॥ पुष्पाणि पां
तु सौश्रियमस्तु ॥ दक्षिणाः पांतु बहु[illegible] देयं चास्तु ॥ यं कृत्वा सर्ववेदयज्ञक्रियाकर्मारंभाः शु
भाः शोभनाः प्रवर्त्तंते ॥ तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहुऋषिमतं संविज्ञा
तं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये वाच्यताम् ॥ व्रतजपनियमतपःस्वाध्यायक्रतुद
यादमन[illegible]दानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयतां ॥ समाहितमनसः स्म ॥
प्रसीदंतु भवंतः प्रसन्नाः स्मः ॥ शांतिरस्तु पुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तु अविघ्नमस्तु आरो
ग्यमस्तु शिवं कर्मास्तु कर्मसमृद्धिरस्तु ॥ वेदसमृद्धिरस्तु शास्त्रसमृद्धिरस्तु ॥ पुत्रसमृद्धि
रस्तु ॥ धनधान्यसमृद्धिरस्तु ॥ इष्टसंपदस्तु ॥ ईशानकोणे बहिर्देशे ॥ अरिष्टनिरसन
मस्तु ॥ यत्पापं रोगं तत्प्रतिहतमस्तु ॥ ततस्तत्पात्रे ॥ यच्छ्रेयस्तदस्तु ॥ उत्तरे कर्मण्यविघ्न
मस्तु ॥ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां ॥
तिथिकरणमुहूर्तनक्षत्रसंपदस्तु ॥ तिथिकरणमुहूर्तग्रहलग्नादिदेवताः प्रीयंतां ॥ तिथि

५ कर्ले मुहूर्त्ते नक्षत्रे सग्रहे सदेवते प्रीयेताम्॥ दुर्गापांचाल्यौ प्रीयेतां॥ अग्निपुरोगा विश्वेदेवाः प्री
यंतां॥ इंद्रपुरोगा मरुद्गणाः प्रीयंतां॥ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंताम्॥ माहेश्वरिपुरोगाः उ
मामातरः प्रीयंताम्॥ वशिष्ठपुरोगा ऋषिगणाः प्रीयंतां॥ अरुंधतीपुरोगाः एकपत्न्यः प्रीयं
ताम्॥ ऋषयश्छंदांस्याचार्य वेदयज्ञाश्च प्रीयंताम्॥ ब्रह्मच ब्राह्मणाश्च प्रीयंताम्॥
श्रीसरस्वत्यौ प्रीयेताम्॥ श्रद्धामेधे प्रीयेताम्॥ भगवती कात्यायनी प्रीयताम्॥ भगवती
वृद्धिकरी प्रीयताम्॥ भगवंतो विघ्नविनायकौ प्रीयेताम्॥ भगवान्स्वामी महासेनः प्री
यताम्॥ हरिहरहिरण्यगर्भाः प्रीयन्ताम्॥ सर्वा ग्रामदेवताः प्रीयंताम्॥ सर्वा कुलदे
वताः प्रीयंताम्॥ हताश्च ब्रह्मद्विषः हताश्च परिपंथिनः॥ हताश्च विघ्नकर्त्तारः॥ शत्रवः
पराभवंतु॥ शाम्यंतु घोराणि॥ शाम्यंतु पापानि॥ शाम्यन्त्वीतयः॥ शुभानि वर्त्तंताम्॥ शि
वा आपः संतु॥ शिवा ऋतवः संतु॥ शिवा अग्नयः संतु॥ शिवा आहुतयः संतु॥ शिवा ओष
धयः संतु॥ शिवा वनस्पतयः संतु॥ शिवा अतिथयः संतु॥ अहोरात्रे शिवे स्याताम्॥ शुक्रां
गारकबुधबृहस्पतिशुक्रशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां
भगवान्नारायणः प्रीयताम्॥ भगवान्पर्जन्यः प्रीयताम्॥ पुण्याहकालान्वाचयिष्ये॥
वाच्यताम्॥ भो ब्राह्मणाः ममगृहे अस्य रुद्रहवनाख्यस्य कर्मणः पुण्याहं भवंतो ब्रुवंतु॥ ५

थममेखलांगुलद्वयोच्छ्रा उभयोरपि द्व्यंगुलो विस्तारः॥ तृतीया विस्तारोच्छ्रायाभ्यां चतुरंगुला
योनिस्तु वितस्तिदीर्घा षट्सप्तान्यतरांगुलविस्तृता मध्ये कूर्मपृष्ठोन्नता गजोष्ठसदृशी कार्या॥ ई
शान्यां ग्रहादिस्थापनार्थं हस्तमात्रविस्तृता वितस्तिप्रमाणोच्छ्राया मेखलाद्वययुक्ता चतुरस्रा
वेदिका कार्या॥ तत्र द्व्यंगुलोच्छ्रिता प्रथममेखला॥ एकांगुलोच्छ्रिता द्वितीया॥ मेखलाद्वयेपि एकै
कांगुलो विस्तारः॥ आग्नेयकोणेपि वास्तुयागार्थं हस्तमात्रं त्रिमेखलं सांगं कुण्डं कार्य्यम्॥ ॥
अथ प्रयोगः॥ शुभे मुहूर्त्ते कर्त्ता सपत्नीकः तिलामलककल्केन स्नात्वा भूषितः सर्वांगो पूर्णकलश
हस्तो मण्डपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्य देशकालौ संकीर्त्य अमुकगोत्रो ऽमुकशर्माहं
श्रीपार्वतीपरमेश्वरप्रीत्यर्थं इष्टकामनोद्देशेन वा॥ स्वयंकृतस्य ब्राह्मणद्वारा कारितस्य वा ऽ
मुकसंख्याकरुद्रजपस्य दशांशेन ग्रहमखपूर्वकं करिष्ये॥ तत्रादौ निर्विघ्नपरिसमाप्त्यर्थं हवनमं २
वरुण५ [illegible] गणेशगौरीपूजां पुण्याहवाचनं मातृकापूजां नांदीश्राद्धं च करिष्ये॥ इति संकल्प्य॥
नमो विवस्वते ब्रह्मन्भास्वते विष्णुतेजसे॥ जगत्सवित्रे शुचये सवित्रे कर्मसाक्षिणे॥ इति सू
र्यार्घ्यं दत्वा॥ खर्वं स्थूलतनुं गजेन्द्रवदनं लंबोदरं सुंदरं प्रस्यंदन्मदगंधलुब्धमधुपव्या
लोलगंडस्थलं॥ दंताघातविदारितारिरुधिरैः सिंदूरशोभाकरं वंदे शैलसुतासुतं गणप
२ तिं सिद्धिप्रदं कर्मसु॥ इति ध्यात्वा गणपते इहागच्छ इह तिष्ठ इह संनिधेहि वरदो भव

नांदीश्राद्धानंतरं शिष्टाचाराद्ग्रंथिबंधनं कृत्वा पत्नीं दक्षिणत उपवेश्य आचार्यादिवरणं कुर्यात् यथा ९

भो॰ ब्रूह॰ कल्याणं भवंतो ब्रुवंतु॥ भो॰ ब्रूह॰ ऋद्धिं भवंतो ब्रुवंतु॥ भो॰ ब्रूह॰ स्वस्ति भवन्तो ब्रुवं
तु॥ भो॰ ब्रूह॰ श्रीरस्त्विति भवंतो ब्रुवंतु॥ अस्तु श्रीः॥ ततः कर्त्ता वामतः पत्नीमुपवेश्य
ब्राह्मणा अभिषिंचेयुः॥ सुवासिन्यो नीराजयेयुः॥ ॥इति पुण्याहवाचनं समाप्तम्
अथ मातृकापूजनं॥ ॥गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा
स्वाहा मातरो लोकमातरः॥ हृष्टिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवताः॥ गणेशेनाधि
का ह्येता वृद्धौ पूज्याश्च षोडश॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वाराही
च तथेंद्राणी चामुंडा सप्तमातरः॥ गौर्यादिषोडशब्राह्म्यादिसप्तमातृकाभ्यो नमः
आवाहनं अत्र गंधादिभिः संपूज्य मंत्रपुष्पांजलिं दत्वा आयांतु मातरः सर्वा॰॥ ॥
अथ नांदीश्राद्धं॥ आचार्यं वृत्वा प्रार्थयेत्॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृह
स्पतिः॥ तथा त्वं मम यज्ञेस्मिन् भवाचार्यो द्विजोत्तमेति॥ ततो ब्रह्माणं वृत्वा प्रार्थयेत्॥
यथा चतुर्मुखो ब्रह्मा स्वर्गलोके पितामहः॥ तथा त्वं मम यज्ञेस्मिन्ब्रह्माणं त्वामहं वृ
णे॥ इति प्रार्थयेत्॥ ततः सदस्यं गणेशं जपार्थं च वृत्वास्मिन्कर्मणि ऋत्विजं त्वाम
हं वृणे इति दश पंच वा ऋत्विजो वृणुयात्॥ ततो द्वारपालान्वृत्वा॥ संभवे सर्वे

६ ष्टां मधुपर्कं दत्वां कृत्वांगुलीयककर्णाभूषणवस्त्रद्वय जलपात्राणि श्रीपर्णीपीठासनार्घ्यपात्रा
णि मध्वाज्यपात्राणि दद्यात्।। द्विराचम्याचार्याय।। ततो मंडपद्वारे संपूजयेत्।। यथा।। ॐ फट्
द्वारार्घ्यं साधयामीति उक्त्वा फडिति पात्रं प्रक्षाल्य नमः इति जले नापूर्य।। गंगे चेति तीर्थावाहनं
प्रणवेन गंधपुष्पं प्रक्षिप्य धेनुमुद्रां प्रदर्श्य फट् कृत्वा मूलेन मंत्रयेदिति सामान्यार्घ्यं जलेन द्वार
देवताः पूजयेत्।। द्वारस्याद्धे भागे गं गणेशाय नमः।। दक्षिणशाखायां महालक्ष्म्यै नमः।। वामे
सरस्वत्यै नमः।। दक्षे विघ्नेशाय नमः।। गंगायै नमः।। यमुनायै।। पुनः वामे क्षेत्रपालाय नमः
गंगायै। यमुनायै नमः।। दक्षे धात्रे। वामे विधात्रे। दक्षे शंखनिधये। वामे पद्मनिधये नमः।। यो:
इति द्वारदेवतां कृत्वा द्वारपालान् पूजयेत्।। यथा पूर्वादि द्वारस्थित दक्षवामस्तंभे संमीपे क
लशौ संस्थाप्य तौ तौ पूजयेत्।। पूर्वे।। नंदी दक्षे।। वामे महाकालाय नमः।। दक्षिणद्वारे।। गणे
शाय।। वृषभाय।। पश्चिमद्वारे।। भृंगरिटये। स्कंदाय।। उत्तरद्वारे।। पार्वतीशाय। चं
डेश्वराय। इत्यष्टौ द्वारपालान् संपूज्य दधिमाषबलिं दत्वा।। लोकपालान् पूजयेत्। यथा
अथ मध्ये वेदिकायां मांगल्यवास्तुभ्यो देवेभ्यो नमः इति संपूज्य दधितंडुलबलिं गृहीत्वा वास्त
धिपद इमं दधितंडुलबलिं गृहाण पयः गृहाण२ मम विघ्ननिवारणं कुरु२ सिद्धिं मम प्रयच्छ स्वा
हा।। इति बलिं दद्यात्।। दुर्गे दुर्गे रक्षिणि स्वाहा।। इति सर्वपात्रं चतुर्दिक्षु विकिरेत्।। ततः तिला ६

न् गृहीत्वा।। तिलोसि सोमदेवत्यो गोसवे देवसृष्टिकारकः।। पितॄणां स्वर्गदाता त्वं मर्त्यानां मम रक्षकः
भूतप्रेतपिशाचानां विघ्नेषु शांतिकारकः।। इति ईशानादि दिक्षु तिलान् क्षिपेत्।। ततः पूर्व
दिशि कलशं संस्थापयित्वा।। तत्र लां इंद्राय सुराधिपतये ऐरावतवाहनाय वज्रहस्ताय शि।। दे
पारिषदाय सपरिवाराय नमः इति पाद्यादिभिरभ्यर्च्य माषभक्तबलिं गृहीत्वा।। ॐ लां इंद्रा
य सुराधिपतये इमं बलिं गृहाण२ पयः गृहाण२ विघ्ननिवारणं कुरु२ मम सिद्धिं प्रयच्छ स्वा
हा।। एष माषभक्तबलिः इंद्राय स्वाहा।। इति सर्वत्र बलिं दद्यात्।। अग्निकोणे कलशं सं
स्थाप्य तत्र।। ॐ रां अग्नये तेजोधिपतये मेषवाहनाय शक्तिहस्ताय रुद्रपारिषदाय सपरि
वाराय नमः इति संपूज्य।। ॐ रां अग्नये तेजोधिपतये मेषवाहनाय इमं बलिं गृहाण२ प
यः गृहाण२ विघ्ननिवारणं कुरु२ मम सिद्धिं प्रयच्छ स्वाहा।। एष माषभक्तबलिरग्नये स्वाहा।।
दक्षिणदिशि कलशं संस्थाप्य तत्र।। ॐ यां यमाय प्रेताधिपतये दंडहस्ताय महिषवा
हनाय सायुधाय सपरिवाराय रुद्रपारिषदाय नमः।। इति संपूज्य।। ॐ यां यमाय
प्रेताधिपतये इमं बलिं गृहाण२ पयः गृहाण२ विघ्ननिवारणं कुरु२ मम सिद्धिं प्रयच्छ स्वा
हा।। एष माषभक्तबलिर्यमाय स्वाहा।। नैर्ऋत्यकोणे पि कलशं संस्थाप्य।। ॐ क्षां निर्ऋत
ये रक्षोधिपतये असिहस्ताय अश्ववाहनाय सायुधाय सपरिवाराय रुद्रपार्षदाय नमः

७ इति संपूज्य ॥ ॐ क्षां निरृतये रक्षोधिपतये इमं बलिं गृहाण २ पयः गृहाण २ विघ्ननिवारणं कु-
रु २ मम सिद्धिं प्रयच्छ स्वाहा ॥ एष माषभक्तबलिर्निरृतये स्वाहा ॥ पश्चिमस्यां दिशि कलशं
संस्थाप्य ॥ तत्र ॐ वां वरुणाय जलानामधिपतये मकरवाहनाय पाशहस्ताय सपरिवारा-
य रुद्रपार्षदाय नमः ॥ इति संपूज्य ॥ ॐ वां वरुणाय जलाधिपतये इमं बलिं गृहाण २ पयः गृ-
हाण २ विघ्ननिवारणं कुरु २ मम सिद्धिं प्रयच्छ स्वाहा ॥ एष माषभक्तबलिर्वरुणाय स्वाहा ॥
ततः वायव्ये कलशं सं० तत्र ॐ यां वायवे प्राणाधिपतये हरिणवाहनाय अंकुशहस्ताय सप-
रिवाराय रुद्रपार्षदाय नमः ॥ इति संपूज्य ॥ ॐ यां वायवे प्राणाधिपतये इमं बलिं गृहाण २
पयः गृहाण २ विघ्ननिवारणं कुरु २ मम सिद्धिं प्रयच्छ स्वाहा ॥ एष माषभक्तबलिर्वाय-
वे स्वाहा ॥ ततः उत्तरे कलशं संस्थाप्य ॥ तत्र कुं कुबेराय यक्षाधिपतये गदाहस्ताय नरवाह-
नाय सपरिवाराय रुद्रपार्षदाय नमः ॥ इति संपूज्य ॥ ॐ कुं कुबेराय यक्षाधिपतये इमं बलिं
गृहाण २ पयः गृहाण २ विघ्ननिवारणं कुरु २ मम सिद्धिं प्रयच्छ स्वाहा ॥ एष माषभक्तबलिः
कुबेराय स्वाहा ॥ ततः ईशान्यां कलशं० ॥ ॐ हां ईशानाय भूताधिपतये त्रिशूलहस्ताय वृष-
वाहनाय सायुधाय सपरिवाराय सवाहनाय रुद्रपार्षदाय नमः ॥ इति संपूज्य ॥ ॐ हां ई-
शानाय भूताधिपतये इमं बलिं गृहाण २ पयः गृहाण २ विघ्ननिवारणं कुरु २ मम सिद्धिं प्रयच्छ स्वाहा ७

ॐ श्रीं अनंताय नागाधिपतये चक्रहस्ताय रथवाहनाय सपरिवाराय नमः ॥ इति संपूज्य ॥ ४

एष माषभक्तबलिः ईशानाय स्वाहा ॥ ततः इन्द्रेशानयोर्मध्ये कलशं० ॥ ॐ आं ब्रह्मणे लोकाधिपतये प-
द्महस्ताय हंसवाहनाय सपरिवाराय रुद्रपार्षदाय नमः ॥ इति संपूज्य ॥ ॐ आं ब्रह्मणे लोकाधिपत-
ये इमं बलिं गृहाण २ पयः गृहाण २ विघ्ननिवारणं कुरु २ मम सिद्धिं प्रयच्छ स्वाहा ॥ एष माषभक्त-
बलिर्ब्रह्मणे स्वाहा ॥ ततः निरृतिवरुणयोर्मध्ये कलशं० ॥ ॐ श्रीं अनंताय नागाधिपतये इमं बलिं
गृहाण २ पयः गृहाण २ विघ्ननिवारणं कुरु २ मम सिद्धिं प्रयच्छ स्वाहा ॥ एष माषभक्तबलिः अनंताय
स्वाहा ॥ ततो मण्डपाद्बहिर्भागे दधिमाषगुडोदनं बलिमादाय ॥ ये चान्ये विघ्नकर्त्तारो भुवि दिव्यंत-
रिक्षगाः ॥ बलिमादाय ते सर्वे निजस्थाने व्रजंत्विति ॥ ततः ईशानकोणे मण्डपाद्बहिः सर्वेभ्यो भूतेभ्यो
नमः इति संपूज्य आधारे माषभक्तदधिगुडोपकरणसप्रदीपं कराभ्यामादाय ॥ भूताये विविधा-
कारा दिग्विदिक्षु समाश्रिताः ॥ पाताल तलसंस्थाश्च ये च लोकांतरस्थिताः ॥ ये गिन्यो घोररूपाश्च
गणानामधिपाश्च ये सर्वे ते प्रीतिमनसो भूत्वा गृह्णन्त्विमं बलिं ॥ इति बलिमुत्सृजेत् ॥ ततः पुष्पांज-
लिमादाय ॥ भूतानि यानीह वसंति लोके बलिं गृहीत्वा विधिवत्प्रयुक्तं ॥ संतोषमासाद्य हि यांतु
सर्वेत्तमं तु मामन्त्र नमोस्तु तेभ्यः ॥ इति विसर्जेत् ॥ ॥ अथ हस्तपादौ प्रक्षाल्याचम्य यजमा-
नो मण्डपांतः प्रविश्य स्वासने तिष्ठेत् ॥ ततो यजमानं प्रति ब्राह्मणा ब्रूयुः ॥ श्रद्धालुः सात्विकः स्वा-
मी अक्रोधी प्रियवाक्चकः ॥ सत्यात्मा विनयोपेतो ब्रह्मचर्यदयान्वितः ॥ यावत्समाप्यते यज्ञस्ता-

८ वृत्वं नियमस्थितः ॥ ततो यजमानो व्रती नदीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ॥ श्रद्धां दक्षिणाया
प्नोति श्रद्धया सत्यमाप्यते इति पठेत् ॥ अत्रैव केचन आह्मणवरणमिच्छंति ॥ ततो दधियवकु
शदूर्वासर्षपगंधाक्षतगोमयपुष्पाणि ॥ रक्षाकंकणसूत्रं च ताम्रभाजने संस्थाप्य पठेत् ॥ गणाधि
पं नमस्कृत्य नमस्कृत्य पितामहं ॥ विष्णुं रुद्रं श्रियं देवीं वंदे भक्त्या सरस्वतीम् ॥ स्थानं क्षेत्रं नमस्कृत्य
दिननाथं निशाकरम् ॥ धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिं ॥ दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं
महाग्रहम् ॥ राहुं केतुं नमस्कृत्य यज्ञारंभं करोम्यहं ॥ गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमम् ॥
वशिष्ठं मुनिशार्दूलं विश्वामित्रं महामुनिं ॥ व्यासं मुनिं नमस्कृत्य सर्वशास्त्रविशारदम् ॥ विद्याधि
काश्च मुनयः आचार्याश्च तपोधनाः ॥ तान्सर्वान्प्रणिपत्याथ यज्ञारंभं करोम्यहं ॥ ततस्तद्दि
क्षि सर्षपान् विकिरन् पठेत् ॥ पूर्वे रक्षतु गोविंद आग्नेय्यां गरुडध्वजः ॥ याम्ये रक्षतु वाराहो ना
रसिंहस्तु नैर्ऋते ॥ केशवो वारुणीं रक्षेद्वायव्यां मधुसूदनः ॥ उत्तरे श्रीधरो रक्षेदीशाने तु गदाध
रः ॥ उर्ध्वं गोवर्द्धनो रक्षेदधस्ताच्च महीधरः ॥ एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ॥ रक्षेद्यस्याग्र
तः शार्ङ्गी पृष्ठे पद्ममनुत्तमम् ॥ वामपार्श्वे गदा रक्षेद्दक्षिणे च सुदर्शनः ॥ रक्षेदुपेंद्रो ब्राह्मणा
माचार्यं पातु वामनः ॥ ऋग्वेदमच्युतो रक्षेद्यजुर्वेदमधोक्षजः ॥ कृष्णो रक्षतु सामानि अ
थर्वाणं तु माधवः ॥ उपद्रष्टा च यो विप्रस्तं रुद्रः पातु सर्वदा ॥ यजमानं सपत्नीकं देवो रक्षेदधो ८

१२ व्याहृतीनां परमेष्ठिप्रजापतिर्ऋषिः अग्निवायुसूर्य्यप्रजापतयो देवता गायत्र्युष्णिगनुष्टुब्बृहत्यश्छंदांसि ॥ सूर्यादित्यमावाहया
मि ॥ ॐ भुवः आदि० ॐ स्वः आदि० ॐ भूर्भुवः स्वः आदि० आकृष्णेनेत्यस्य हिरण्यस्तूप ऋषिः सविता देवता त्रिष्टुप् छंदः आकृष्णेनेति पठे
त्

क्षजः ॥ रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षतां हरिः ॥ इति रक्षां कृत्वा रक्षाकंकणं आचार्यादिब्राह्मणानां
यजमानस्य च बध्नीयात् ॥ ॥ ततः आचार्यः ऐशान्यां दिशि रक्तवस्त्रं निपात्य तत्र चूर्णादिना नवग्र
हस्थापनं कुर्यात् ॥ तथा च ॥ आरक्तं भास्करं मध्ये वर्तुलं द्वादशांगुलं ॥ आग्नेय्यां श्वेतमर्द्धेन्दुम
र्कद्विगुणमायतम् ॥ याम्यामारं त्रिकोणं च रक्तं स्यात्त्र्यंगुलम् ॥ ईशान्यां धनुषाकारं बुधं पी
तं षडंगुलम् ॥ जीवमष्टांगुलं पीतं उत्तरे पंकजाकृतिम् ॥ नवांगुलं भृगुं पूर्वे चतुःकोणं सितप्र
भम् ॥ सप्तांगुले शनिं कृष्णं दंडाकारं तु पश्चिमे ॥ नैर्ऋत्यां मकराकारं राहुं धूम्रमिनांगुलम् ॥ वा
यव्यां धूम्रमिलं केतुं खड्गाकारं षडंगुलम् ॥ सर्वान्वा मंडलीकृत्य स्थापयेद्यत्नतः सुधीः ॥ स्थापये
द्वै ततः सर्वान् साधिप्रत्यधिदेवतान् ॥ भुजार्कौ प्राङ्मुखौ स्थाप्यौ गुरुसौम्यावुदङ्मुखौ ॥ प्रत्य
ङ्मुखौ सोमशनी शेषा याम्यमुखाः स्मृताः ॥ किंवार्काभिमुखाः सर्वे स्थापनीयाः प्रयत्न
तः ॥ इत्येवमेतान्संस्थाप्य ॥ ततो गणेशं संपूज्य नवग्रहपूजामारभेत् ॥ तथा च ॥ पद्मा
सनः पद्मकरो द्विबाहुः पद्माकृतिः सप्ततुरंगवाहः ॥ दिवाकरो लोकगुरुः किरीटी मयि प्रसी
दं विदधातु देवः ॥ इति ध्यात्वा ॥ भगवन्नादित्य ग्रहाधिपते कश्यपगोत्र कलिंगदेशेश्वर ज
पापुष्पोपमांगद्युते द्विभुज पद्माभयहस्त सिंदूरवर्णांबरमाल्यानुलेपन ज्वलन्माणिक्य विचि
त्रसर्वाभरण भास्कर तेजोनिधे त्रिलोकप्रकाश त्रिदेवमयमत्ते नमस्ते सन्नद्धारुणध्वजपता

कोपशोभितेन सप्ताश्वरथवाहनेन मेरुं प्रदक्षीकुर्वन्नागच्छाग्निरुद्राभ्यां सह पद्मकर्णिकायां पी
९ ठे धितिष्ठ पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वे पिंगश्मश्रुभ्रूकेशं पिंगाक्षं त्रिनयनमरु
णच्छागस्थं साक्षसूत्रं सप्तार्चिषं शक्तिधरं वरदहस्तद्वयं आदित्योदितमग्निमावाहया
मि॥ वामपार्श्वे त्रिलोचनोपेतं पंचवक्त्रं वृषारूढं कपालखट्वांगधरं चन्द्रमौलिं आदित्यप्र
त्यधिदेवं रुद्रमावाहयामि॥ इत्यावाह्य सूर्यं पाद्यादिभिरभ्यर्च्य॥ अग्निरुद्रौ पूजयेत्॥ ॥
ततः श्वेतांबरः श्वेतविभूषणश्च श्वेतद्युतिर्दंडधरो द्विबाहुः॥ चन्द्रः सुधात्मा वरदः किरीटी श्रे
यांसि मह्यं विदधातु देवः॥ इति ध्यात्वा॥ ॐ भूः सोममावाहयामि॥ ॐ भुवः सोममावाहयामि
ॐ स्वः सोममावाहयामि॥ ॐ भूर्भुवः स्वः सोममावाहयामि॥ आप्यायस्वेत्यस्य गोतम ऋषिः सो
मो देवता [illegible]यत्री छंदः सोमावाहने विनियोगः॥ आप्यायस्वेति मंत्रमुच्चार्य॥ सोम द्विजा[illegible]
धिपते सुधामयशरीर अत्रिगोत्रयमुनादेशेश्वर गोक्षीरधवलांगकांते गदावरदांकितकरभु
क्षौवरमाल्यानुलेपनसर्वांगभूषणमौक्तिकाभरण समस्तलोकाप्यायक देवताश्वादमूर्तेनम
स्ते सन्नद्धधवलध्वजपताकोपशोभितेन दशश्वेताश्वरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छा
द्धिरुमयाच सह पद्मस्याग्नेयदलमध्ये पीठे धितिष्ठ पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वे॥
स्त्रीरूपधारिणीः श्वेतरूपमकरवाहनाः पाशाकुलेशधारिणीमुक्ताभरणभूषिताः सोमाधिदे ९
वता अप आवाहयामि॥ वामपार्श्वे अक्षसूत्रदर्पणकमंडलुधारिणीं त्रिदशापूजितां सोमप्रत्ये

धिदेवतामुमामावाहयामि॥ इति आवाह्य॥ सोममभ्यर्च्य अपः उमां च पूजयेत्॥ ततः रक्तांबरो रक्तवपुः
किरीटी चतुर्भुजः खड्गगदाधरश्च॥ धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः॥ इति
ध्यात्वा॥ ॐ भूः भौममावाहयामि॥ ॐ भुवः भौममावाहयामि॥ ॐ स्वः भौमम० ॐ भूर्भुवः स्वः भौ
म०॥ अग्निर्मूर्द्धेत्यस्य विरूप ऋषिः भौमो देवता गायत्री छन्दः भौमावाहने विनि० अग्निर्मूर्द्धेति मं
त्रमुच्चार्य॥ भगवन् भौम अम्यारूते भारद्वाजगोत्रावंतिदेशेश्वर ज्वालापुंजोपमांगद्युते चतुर्भु
ज शक्तिशूलगदाखड्गधर रक्तांबर रक्तमाल्यानुलेपन प्रवालाभूषित कुशलोकदीप्तेन नमस्ते
सन्नद्धरक्तध्वजपताकोपशोभितेन रक्तमेषवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ भूमिस्कंदा
भ्यां सह पद्मस्य दक्षिणदलमध्ये पीठे धितिष्ठ पूजार्थं त्वामावाहयामि॥ दक्षिणपार्श्वे शुक्लवर्णां
दिव्याभरणभूषितां चतुर्भुजां सौम्यवपुषं चं शंभुसदृशां वरां रत्नसस्यपात्रौषधिपात्रपद्मो
पेतकरां चतुर्दिग्भागभूषितां पद्मासनगतां भौमाधिदेवतां भूमिमावाहयामि॥ तद्वामपार्श्वे॥
षण्मुखं शिखंडिभूषितं रक्तांबरधरं मयूरवाहनं कुक्कुटघंटापताकाशक्त्युपेतचतुर्भुजं
भौमप्रत्यधिदेवं स्कन्दमावाहयामि॥ इत्यावाह्य भौमं संपूज्य॥ भूमिस्कंदौ पूजयेत्॥ ईशा
नदले॥ पीतांबरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च शूली॥ चर्मासिधृक् सोमसुतः स
दासौसिंहाधिरूढो वरदोस्तु मह्यं॥ इति ध्यात्वा॥ ॐ भूः बुधमा० ॐ भुवः बुधमा० ॐ स्वः बु

१० धमा० ॐ भूर्भुवः स्वः बुधमा०॥ उद्बुध्यस्वेति मंत्रस्य बुध ऋषिः सौम्यो देवता त्रिष्टुप् छंदः उद्बुध्यस्वेति मं
त्रमुच्चार्य्य॥ भगवन्सौम्यात्रेयस वर्णस्थान मया त्रिगोत्र मगध देशेश्वर कुंकुमवर्णाभद्युते चतुर्भुज खं
ड्ग चर्म गदा खेटक धर पीतांबर पीत माल्यानुलेपन मकर कुंडलांगदाद्याभरण भूषित विश्रुद्ध मते
नमस्ते सन्तु पीत ध्वजपताका पशोभितेन चतुःसिंह रथ वाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ विष्णुपु
रुषाभ्यां सममपरत्रैशान दलमध्ये पीठेऽधितिष्ठ पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वे कौमोदकीप
द्मशंख चक्रोपेतं चतुर्भुजं सौम्याधिदेवं विष्णु पुरुषमावाहयामि॥ वामे कौमोदकीपद्मशंख चक्रोपे
तं सौम्य प्रत्यधिदेवं विष्णु पुरुषमावाहयामि॥ इत्यावाह्य सौम्यं संपूज्य विष्णुपुरुषौ पूजयेत॥
बुध पूजायां अधिदेवः प्रत्यधिदेवश्च विष्णुरेव॥ उत्तरदले॥ पीतांबरः पीतवपुः किरीटी चतुर्भु
जो देवगुरुः प्रशांतः॥ दधाति दंडं च कमंडलुं च तथाक्षसूत्रं वरदोस्तु मह्यं॥ इति ध्यात्वा॥ ॐ
भूर्बृहस्पतिमावाहयामि॥ ॐ भुवः बृह० ॐ स्वः बृह० ॐ भूर्भुवः स्वः बृह०॥ बृहस्पते इत्यस्य गृ
त्समद ऋषिर्बृहस्पतिर्देवता त्रिष्टुप् छंदः बृहस्पते इति मंत्रमुच्चार्य्य॥ भगवन्बृहस्पते समस्त दे
वगुरो आंगिरस गोत्र सिंधु देशेश्वर दीप्त सुवर्ण सदृशद्युते चतुर्भुज दंड कमंडलु अक्षसूत्र वर
दानांकित कर पीतांबर पीत माल्यानुलेपन समस्त विद्याधिपते नमस्ते सन्तु पीत ध्वज पता
कोपशोभितेन पीताश्व रथ वाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छेन्द्र ब्रह्मभ्यां सह पश्चोत्तरदल १०

मध्ये पीठेऽधितिष्ठ पूजार्थं त्वामावाहयामि॥ दक्षिणपार्श्वे चतुर्दंत गजारूढं वज्रांकुशधरं शचीप
तिं नानाभरणभूषितं बृहस्पत्यधिदेवतमिन्द्रमावाहयामि॥ वामे पद्मासनस्थं जटिलं चतुर्मुख
मक्षसूत्र श्रुक्स्रुव पुस्तक कमंडलु धरं कृष्णाजिन वाससं पार्श्वस्थित हंससहितं बृहस्पति प्रत्यधि
देवं ब्रह्माणमावाहयामि॥ इत्यावाह्य बृहस्पतिमभ्यर्च्य इन्द्र ब्रह्माणौ पूजयेत्॥ प्राग्दले॥ श्वेतां
बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशांतः॥ दधाति दंडं च कमंडलुं च तथाक्षसूत्रं वरदो
स्तु मह्यम्॥ इति ध्यात्वा॥ ॐ भूः शुक्रमा० ॐ भुवः शु० ॐ स्वः शु० ॐ भूर्भुवः स्वः शु०॥ ॐ शु
क्रं ते अन्यदित्यस्य भारद्वाज ऋषिः शुक्रो देवता त्रिष्टुप् छंदः शुक्रं ते अन्यदिति मंत्रमुच्चार्य्य॥
भगवन् शुक्र समस्त दैत्यगुरो भार्गव गोत्र भोजकट देशेश्वर रजतोज्वलकांते चतुर्भुज दंड कमं
डलु अक्षसूत्र वरदानांकित कर शुक्लांबर शुक्ल माल्यानुलेपन नवरत्नाभरण भूषित समस्त नी
तिशास्त्र निपुण मते नमस्ते सन्तु शुक्ल ध्वज पताकोपशोभितेन शुक्लाश्व सहित रथेन मेरुं
इन्द्र ५ प्रदक्षिणीकुर्वन्नागच्छेन्द्राणी [redacted] भ्यां सह पूर्व दलमध्ये पीठेऽधितिष्ठ पूजार्थं त्वामावाहया
इन्द्र ४ मि॥ इत्यावाह्य शुक्रं संपूज्य इन्द्राणी [redacted] पूजयेत्॥ ॥ दक्षिणपार्श्वे चतुर्दंत गजा
शचीपतिं ३ रूढं वज्रांकुशधरं पीतवर्णां [redacted] नानाभरणभूषितं शुक्राधिदेवतमिन्द्रमावाहयामि॥ वामे
पीतवर्णां नानाभरणभूषितां शुक्र प्रत्यधिदेवतामिन्द्राणीमावाहयामि॥ इति इन्द्रेन्द्राण्यौ
पूजयेत्॥ ॥ पश्चिम दले॥ नील द्युतिः शूलकधरः किरीटी गृध्रस्थितः त्रासकरो धनुष्मान्

११ चतुर्भुजः सूर्यसुतः प्रशांतः सदास्तु मह्यं वरदः शनैश्चरः ॥ इति ध्यात्वा ॥ ॐ भूः शनैश्चरमा० ॐ भुवः श०
ॐ स्वः श० ॐ भूर्भुवः स्वः श० ॥ शमग्निरिति मंत्रस्य हिरिंबिठि ऋषिः शनैश्चरो देवता उष्णिक् छन्दः शम
ग्निरिति मंत्रमुच्चार्य्य ॥ भगवन् शनैश्चर भास्करतनय काश्यपगोत्र सुराष्ट्रदेशेश्वर कज्जलनीलां
गकान्ते चतुर्भुज चाप[redacted]शक्तिशूल तूणीकृतपाणे भयांकित नीलांबर नीलमाल्यानुलेपन नील
रत्नभूषणालंकृत समस्तभुवनभीषणामर्षमूर्ते नमस्ते सन्नद्ध नीलध्वजपताकोपशोभितेन नी
लगृध्ररथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ प्रजापतियमाभ्यां सह पश्चिमदले पीठेऽधि
तिष्ठ पूजार्थं त्वामावाहयामि ॥ दक्षिणपार्श्वे ॥ यज्ञोपवीतिनं हंसस्थं जटिलं अक्षमालास्रुक्स्रुव
कमण्डलुसहितं चतुर्भुजं शनैश्चराधिदेवं प्रजापतिमावाहयामि ॥ वामे ईषत्पीनदण्डहस्ते रक्त
वस्त्रं पाशधरं कृष्णवर्णं महिषारूढं सर्वाभरणभूषितं शनैश्चरप्रत्यधिदेवतं यममावाहया
मि ॥ इत्यावाह्य शनैश्चरं संपूज्य प्रजापतियमौ पूजयेत् ॥ ॥ नैर्ऋत्यदले ॥ नीलांबरो नीलव
पुः किरीटी करालवक्त्रः करवालशूली ॥ चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदोस्तु मह्य
मू ॥ इति ध्यात्वा ॥ ॐ भूः राहुमा० ॐ भुवः रा० ॐ स्वः राहु० ॐ भूर्भुवः स्वः राहु० ॥ कयान इत्य
स्य वामदेव ऋषिः राहुर्देवता गायत्री छन्दः कयान इति मंत्रमुच्चार्य्य ॥ भगवन् राहो रविसोम
मर्द्दक सिंहिकानन्दन पैठीनसिगोत्र बर्बरदेशेश्वर कालमेघद्युते व्याघ्रवदन चतुर्भुज खड्ग ११
चर्मशूलवरदांकित कृष्णांबरमाल्यानुलेपन गोमेदिकाभरणभूषित नमस्ते सन्नद्ध कृष्णध्व

जपताकोपशोभितेन कृष्णसिंहरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ सर्पकालाभ्यां सह पश्चिमनैर्ऋत
दलमध्ये पीठे अधितिष्ठ पूजार्थं त्वामावाहयामि ॥ दक्षिणपार्श्वे ॥ अनंतसूत्रधरान् कुंडलितवदनान् स
र्वाभरणभूषितान् राहुप्रत्यधिदेवान् सर्पानावाहयामि ॥ वामपार्श्वे ॥ करालवदनं नित्यभीषणं पाश
दण्डधरं सर्पवृश्चिकैर्मालिनं राहुप्रत्यधिदेवं कालमावाहयामि ॥ इत्यावाह्य राहुं संपूज्य सर्पकालौ
पूजयेत् ॥ प्रत्यगुत्तरदले ॥ धूम्रो द्विबाहुर्वरदो गदाभृत् गृध्रासनस्थो विकृताननश्च ॥ किरीटकेयूर
विभूषितांगः सदास्तु मे केतुगणः प्रशांतः ॥ इति ध्यात्वा ॥ ॐ भूः केतु० ॐ भुवः केतु० ॐ स्वः केतु०
ॐ भूर्भुवः स्वः केतु० ॥ केतुं कृण्वन्निति मंत्रस्य मधुच्छंद ऋषिः केतुर्देवता गायत्री छन्दः केतुं कृ
ण्वन्निति मंत्रमुच्चार्य्य ॥ भगवन् केतो कामरूपजैमिनिगोत्र मध्यदेशेश्वर सन्नद्ध चित्रध्वजप
ताकोपशोभितेन द्विकपोतरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ ब्रह्मचित्रगुप्ताभ्यां सह पश्चिमवा
यव्यदलमध्ये पीठे अधितिष्ठ पूजार्थं त्वामावाहयामि ॥ दक्षिणपार्श्वे पद्मासनस्थं जटिलं चतुर्भुजं
अक्षमालास्रुक्पुस्तककमंडलुधरं कृष्णाजिनवाससं पार्श्वस्थितहंसं केत्वधिदेवं ब्रह्माणमा
वाहयामि ॥ वामे ॥ दुर्गीस्थवेषधरं सौम्यदर्शनं लेखनीपत्रोपेतद्विभुजं केतुप्रत्यधिदेवं चित्रगु
प्तमावाहयामि ॥ इत्यावाह्य [illegible] केतुं संपूज्य ॥ ब्रह्मचित्रगुप्तौ पूजयेत् ॥ ॥ इति नवग्रह
पूजा ॥ ॥ अग्न्युत्तमानः [redacted]सामने उपविश्य ॥ ॐ गुरवे नमः ॥ गणपत
ये० ॥ द्वारश्रियै० दुर्गायै० क्षेत्रपालाय० ॐ अस्त्रायफडिति ॥ वास्तुपुरुषाय नमः ॥

१२ श्री उमामहेश्वराय नमः ॥ इति नत्वा ॥ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्म्मो दे
वता आसनासने विनियोगः ॥ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां देवि प
वित्रं कुरु चासनं ॥ ॐ ह्रीं आधारशक्तिकमलासनाय नमः ॥ अनंतासनाय नमः ॥ अपसर्प
न्तु ते भूता पिशाचाः सर्वतो मुखाः ॥ सर्वेषाम विरोधेन यज्ञार्थं करोम्यहम् ॥ अपसर्पन्तु
ये भूता ये भूता भुवि संस्थिताः ॥ ये भूता विघ्नकर्त्तारस्ते नश्यंतु शिवाज्ञया ॥ २ ॥ इति पठि
त्वा वामपार्ष्णिघातत्रयं कृत्वा फट् अस्त्राय इति तालत्रयं दत्वा ॥ गणपतिं सरस्वतीं क्षेत्रपा
लं नत्वा ॥ रं फडित्यग्निप्राकारं विचिंत्य समंताज्जलधारां दत्वा ॥ मूलेनाचम्य प्राणानाय
म्य देशकालौ स्मृत्वा अस्मिन्नुमलके कर्त्तव्यरुद्रहवन [illegible] कर्म्मणि श्री सदाशिवस्य पंचाक्ष
र विधानेन न्यासपूजादिकं करिष्ये ॥ इति संकल्प्य ॥ भूतशुद्धिं कुर्य्यात् ॥ तत्र हंसः इति मंत्रेण
हृदयाज्जीवात्मानं मूलाधारस्थितकुण्डलिन्या सह सुषुम्णामार्गेण शिरसि स्थितसहस्रा
रकमलकर्णिकामध्यवर्त्तिनि परमात्मनि संयोज्य ॥ पादाद्याजानुपर्य्यंतं पृथ्वीमप्सु ह
रामि ॥ जान्वाद्यानाभिपर्यन्तं अपस्तेजसि हरामि ॥ नाभेराकंठं तेजो वायौ हरामि ॥ कंठाद्याभ्रू
मध्यं वायुमाकाशे हरामि ॥ भ्रूमध्याद्याब्रह्मरंध्रं आकाशं अहंकारे हरामि ॥ अहंका
रं महति महान्तं प्रकृतौ प्रकृतिं पुरुषे पुरुषं सदाशिवसंज्ञे ब्रह्मणि संहरामीति भूतादीनि सं १२

हृत्य ॥ वामकुक्षौ अंगुष्ठपरिमाणकं पापपुरुषं ध्यायेत् ॥ ब्रह्महत्याशिरस्कं स्वर्णस्तेयभुजद्वयम्
सुरापानहृदायुक्तं गुरुतल्पकटिद्वयम् ॥ तत्संयोगपदद्वन्द्वं अंगप्रत्यंगपातकं ॥ उपपातकरोमाणं
रक्तश्मश्रुविलोचनम् ॥ खड्गचर्मधरं भीमं उग्रदंष्ट्राकरालकम् ॥ इति ध्यात्वा यंबीजेन पूरकेण
१६ शोषितमत्वा ॥ रं बीजेन ६४ कुंभकेन दग्ध्वा ॥ यं बीजेन ३२ रेचकेन निःसार्य्य ॥ वं बीजेनाम
तवृष्टिं विभाव्य लं बीजेन घनीकृत्य हं बीजेन देहावयवान्निष्पन्नानुध्यात्वा सोहं मंत्रेण प
रमात्मसकाशात् जीवात्मानं हृदि समानीय ब्रह्मणः प्रकृतिः प्रकृतेर्महान् महतोऽहंकारः अ
हंकारादाकाशः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथ्वी पृथिव्या ओषधयः ओ
षधिभ्योऽन्नं अन्नाद्रेतो रेतसः पुरुष इति देहोत्पत्तिं विभावयेदिति भूतशुद्धिः ॥ ततः प्राणप्र
तिष्ठां कुर्य्यात् ॥ प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुशिवऋषिभ्यो नमः शिरसि ॥ ऋग्यजुःसा
मछन्दोभ्यो नमः मुखे ॥ प्राणशक्ति देवतायै नमः हृदये ॥ आं बीजाय नमः गुह्ये ॥ ह्रीं श
क्तये नमः पादयोः क्रौं कीलकाय नमः सर्वांगे ॥ अं कं खं गं घं ङं [illegible] पृथिव्यप्तेजोवाय्वाकाशात्म
ने आं अंगुष्ठाभ्यां नमः ॥ इं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां नमः ॥ उं टं
ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं मध्यमाभ्यां नमः ॥ एं तं थं दं धं नं वाक्पाणिपाद

१२ पायूपस्थात्मने ऐं अनामिकाभ्यां नमः ॥ ॐ पं फं बं भं मं वचनादानगमनविसर्गानंदात्म
ने औं कनिष्ठिकाभ्यां० अं यं रं लं वं शं षं सं हं ळं क्षं मनोबुद्धिचित्ताहंकारात्मने अः करतलकरपृ
ष्ठाभ्यां ॥ एवं हृदयादि ॥ अथ ध्यानं ॥ नवयौवनगर्वां पीनोन्नतस्तनशोभिनीम्‌ ॥ पाशं चापा
सृक्कपाले स्फुलीपूर्णस्तलं हस्तैर्बिभ्रतीं रक्तवर्णां ॥ रक्तोदन्वत्पोतरक्ताम्बुजस्थां देवीं ध्यायेत्प्रा
णशक्तिं त्रिनेत्रां ॥ इति ध्यात्वा हृदये करं धृत्वा त्रिवारं मंत्रं जपेत्‌ ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं
षं सं हं ळं क्षं हंसः सोहं मम प्राणा इह प्राणाः ॥ ॐ आं ह्रीं क्रों यं० मम जीव इह स्थितः ॥ आं ह्रीं क्रों यं०
मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रत्वक्घ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥
ततः पंचदशवारं प्रणवं जपेत्‌ ॥ संस्कारान्‌ विभावयेत्‌ ॥ इति प्राणप्रतिष्ठा ॥ ॥ अथ
श्रीकण्ठादिन्यासः ॥ अस्य श्रीश्रीकण्ठादिमातृकान्यासस्य ब्रह्मा ऋषिः गायत्री छंदः मा अर्द्धनारीश्वरो ९
तृका सरस्वती देवता हलो बीजानि स्वराः शक्तयः ... कीलकं न्यासे विनियोगः ॥ अं कं० आं अंगु
ष्ठयोः ॥ इं कं० ५ ईं तर्जन्योः ॥ उं टं० ५ ऊं मध्यमयोः एं तं० ५ ऐं अनामिकयोः ॥ ओं पं० ५ औं कनि
ष्ठिकयोः ॥ अं यं १० अः करतलकरपृष्ठयोः ॥ एवं हृदयादि ॥ ॥ अथ न्यासः ॥ अं श्रीकं
ठेशपूर्णोदरीभ्यां नमः ललाटे ॥ आं अनंतेशविरजाभ्यां मुखवृत्ते ॥ इं सूक्ष्मेशशाल्मली
भ्यां० दक्षनेत्रे ॥ ईं त्रिमूर्तीशलोलाक्षीभ्यां नमः वामनेत्रे ॥ उं अमरेशवर्तुलाभ्यां० दक्षकर्णे १२

ऊं अर्घीशदीर्घघोणाभ्यां० वामकर्णे ॥ ऋं भारभूतेशदीर्घमुखीभ्यां० दक्षिणनासापुटे ॥ ॠं ति
थीशगोमुखीभ्यां० वामनासापुटे ॥ ऌं स्थाण्वीशदीर्घजिह्वाभ्यां० दक्षगंडे ॥ ॡं हरेशकुण्डो
दरीभ्यां० वामगंडे ॥ एं झिंटीशऊर्ध्वकेशिनीभ्यां० ऊर्ध्वोष्ठे ॥ ऐं भौतिकेशविकृतमुखीभ्यां०
अधरोष्ठे ॥ ओं सद्योजातेशज्वालामुखीभ्यां० ऊर्ध्वदन्तपङ्क्तौ ॥ औं अनुग्रहेशोल्कामु
खीभ्यां० अधोदन्तपंक्तौ ॥ अं अक्रूरेशश्रीमुखीभ्यां० मूर्ध्नि ॥ अः महासेनेशविद्यामु
खीभ्यां० वक्त्रे ॥ कं क्रोधीशमहाकालीभ्यां० दक्षबाहुमूले ॥ खं चण्डेशसरस्वतीभ्यां०
कूर्परे ॥ गं पंचान्तकेशसर्वसिद्धिगौरीभ्यां० मणिबंधे ॥ घं शिवोत्तमेशत्रैलोक्यविद्या
भ्यां० अंगुलीमूले ॥ ङं एकरुद्रेशमंत्रशक्तिभ्यां० अंगुल्यग्रे ॥ चं कूर्मेशात्मशक्तिभ्यां०
वामबाहुमूले ॥ छं एकनेत्रेशभूतमातृभ्यां० कूर्परे ॥ जं चतुराननेशलंबोदरीभ्यां०
मणिबंधे ॥ झं अजेशद्राविणीभ्यां० अंगुलीमूले ॥ ञं सर्वेशनागरीभ्यां० अंगुल्यग्रे ॥
टं सोमेशखेचरीभ्यां० दक्षपादमूले ॥ ठं लांगलीशमंजरीभ्यां० जानुनि ॥ डं दारुकेशरूपिणीभ्यां०
गुल्फे ॥ ढं अर्द्धनारीशवीरिणीभ्यां० पादांगुलीमूले ॥ णं उमाकान्तेशकाकोदरीभ्यां० अंगुली
मूले ॥ तं आषाढीशपूतनाभ्यां० वामपादमूले ॥ थं दण्डीशभद्रकालीभ्यां० जानुनि ॥ दं अ
त्रीशयोगिनीभ्यां० वामगुल्फे ॥ धं मीनेशशंखिनीभ्यां० अंगुलीमूले ॥ नं मेषेशतर्जनीभ्यां०

१४ अंगुल्यग्रे॥ पं लोहितेशकालरात्रिभ्यां नमः दक्षपार्श्वे॥ फं शिखीशकुब्जिनीभ्यां० वामपार्श्वे॥
बं छगलंडेशकपर्दिनीभ्यां० पृष्ठदेशे॥ भं द्विरंडेशवज्रिणीभ्यां० नाभौ॥ मं महाकालजयाभ्यां० कुक्षौ
यं त्वगात्मभ्यां वालीशसुमुखीभ्यां० हृदि॥ रं असृगात्मभ्यां भुजंगेशरेवतीभ्यां० दक्षांसे॥ लं मा
सात्मभ्यां पिनाकीशमाधवीभ्यां० ककुदि॥ वं मेदआत्मभ्यां खड्गीशवारुणीभ्यां० वामांसे॥ शं
अस्थ्यात्मभ्यां बकेशवायवीभ्यां० हृदयादिदक्षकराग्रांतम्॥ षं मज्जात्मभ्यां श्वेतेशरक्षोविदारि
णीभ्यां० हृदयादिदक्षपादाग्रांतम्॥ सं शुक्रात्मभ्यां भृग्वीशसहजाभ्यां० हृदयादि वामकराग्रां
तम्॥ हं प्राणात्मभ्यां लकुलीशलक्ष्मीभ्यां० हृदयादि वामपादाग्रांतं॥ लं शक्त्यात्मभ्यां शिवेश
व्यापिनीभ्यां० हृदयादिजठरांतम्॥ क्षं क्रोधात्मभ्यां संवर्तकेशमहामायाभ्यां नमः हृदयादिवे
दनांतम्॥ इति श्रीकंठादिन्यासः॥ ॥अथ मूलेन प्राणायामं कृत्वा मूलमंत्रस्य ऋष्या
दिन्यासं कुर्यात्॥ अस्य श्रीपंचाक्षरीसदाशिवमंत्रस्य वामदेव ऋषिः पंक्तिश्छंदः श्रीसदा
शिवो देवता मम चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः॥ वामदेव ऋषये नमः शिरसि॥
ॐ पंक्तिछंदसे नमः मुखे॥ श्रीसदाशिवदेवतायै नमः हृदये॥ नं अंगुष्ठाभ्यां० मः तर्जनी
भ्यां० शिं मध्यमाभ्यां० वां अनामिकाभ्यां० यं कनिष्ठिकाभ्यां० नमः शिवाय करतलकरपृ
ष्ठाभ्यां० नं हृदयाय नमः॥ मः शिरसे स्वाहा॥ शिं शिखायै वषट्॥ वां कवचाय हुं॥ यं नेत्र १४
त्रयाय वौषट्॥ नमः शिवाय अस्त्राय फट्॥ नं तत्पुरुषाय नमः तर्जन्योः॥ मः अघोराय नमः

अथ करांगुलीन्यासः १

मध्यमयोः॥ शिं सद्योजाताय नमः कनिष्ठिकयोः॥ वां वामदेवाय नमः अनामिकयोः॥ यं ईशानाय
नमः अंगुष्ठयोः॥ अथ पंचमूर्तिन्यासः॥ नं तत्पुरुषाय नमः मुखे० मः अघोराय नमः हृदि॥ शिं
सद्योजाताय नमः पादयोः॥ वां वामदेवाय नमः गुह्ये॥ यं ईशानाय नमः मूर्ध्नि॥ अथ पंचवक्त्रन्या
सः॥ नं तत्पुरुषाय नमः पूर्वमुखे॥ मः अघोराय नमः दक्षिणमुखे॥ शिं सद्योजाताय नमः प
श्चिममुखे॥ वां वामदेवाय नमः उत्तरमुखे॥ यं ईशानाय नमः मध्यमुखे॥ पुनः षडंगन्यासः
नं हृदयाय नमः॥ मः शिरसे स्वाहा॥ शिं शिखायै वषट्॥ वां कवचाय हुं॥ यं नेत्रत्रयाय वौषट्
नमः शिवाय अस्त्राय फट्॥ नमोस्तु स्थाणुभूताय ज्योतिर्लिंगामृतात्मने॥ चतुर्मूर्तिवपुश्छा
याभासितांगाय शंभवे॥ अनेन मंत्रेण व्यापकं कृत्वा ध्यायेत्॥ ध्यायेन्नित्यं महेशं रजतगि
रिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं॥ पद्मासी
नं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्वरूपं निखिलभयहरं पंचवक्त्रं
त्रिनेत्रम्॥ इति ध्यात्वा मानसैः पंचोपचारैः प्रजपेत्॥ अष्टोत्तरशतं जपेत्॥ इति पंचाक्ष
रीन्यासविधिः॥ अथेष्टदेवतापूजा लिख्यते॥ तत्रादौ वेद्यां लिंगतोभद्रमंडलस्यावश्य
कत्वात्तदुद्धारः प्रदर्शनेनानुक्रमिष्यते॥ ॥वेद्यां पूर्वपश्चिमायताश्चतुर्विंशतिरेखाः कृत्वा
तिर्यक् दक्षिणोत्तरायताश्चतुर्विंशतिरेखाः लिखेत्॥ ततः कोणेषु चतुर्षु पंचपदाः अष्टरखलाः

१५

कलशं कृत्वा॥ तदुभयपार्श्वतः नवपदाः वल्ल्यः हरिताः॥ वल्लीनां पार्श्वतः पुनः लघुश्वेतवल्ल्यश्च
तुःपदाः स्फटिकवर्णाः॥ तत्पार्श्वतः लघुवल्ल्यः षड्भिःपदैः पीताः॥ तत्पार्श्वतः अष्टादशभिःप
दैः कृष्णवर्णानि लिंगानि [illegible] कारयेत्॥ लिंगयोर्मध्ये त्रयोदशपदाः वाप्यश्वेतस्ताः कार्याः
श्वेतवर्णाः॥ ततः पूर्वादिषु वापिकानामुपरि पंचपदानि द्वाराणि पीतवर्णानि कारयेत्॥
ततः कोणेषु अर्द्धचंद्राकाराणि पंचपदात्मकानि श्वेतानि पीठपादानि कुर्यात्॥ ततश्च
त्वारिंशत्पदात्मकं परिध्याकारं पीठं श्वेतं कल्पयेत्॥ पीठतः कोणेषु त्रिपदाः शृं
खलाः स्फाः कार्याः॥ ततः एकादशपदाः वल्ल्यः हरिताः वल्लीमध्ये चतुष्पदं पीतंभ
द्रं कार्यं॥ मध्ये नव [illegible] पदात्मकं [illegible] पद्मं कुर्यात्॥ पीतवर्णां कर्णिकां रक्तपत्रं कु
र्यात्॥ [illegible] एवं लिंगतोभद्रे सिद्धे देवतास्तत्रावाह्य पू
जयेत्॥ ताः देवताः सर्वतोभद्रपूजाप्रसंगे पुरस्ताद्दर्शिताः॥ लिंगतोभद्रसर्वतोभद्रयो
र्देवताभेदो भावि लिंगपूजने विशेषः॥ अष्टसु लिंगेषु पूर्वादिक्रमेण॥ अर्कमूर्त्तये भवा
य नमः॥ सोममूर्त्तये शर्वाय नमः॥ वायुमूर्त्तये रुद्राय नमः॥ अग्निमूर्त्तये पशुपतये नमः॥
जलमूर्त्तये उग्राय नमः॥ आकाशमूर्त्तये महते नमः॥ पृथ्वीमूर्त्तये भीमाय नमः॥ यजमा
नमूर्त्तये ईशानाय नमः॥ इति लिंगतोभद्रं संपूज्य॥ सामान्यार्घ्यं स्थापयेत्॥ ६॥ १५

स्वपुरतः किंचिद्वामाग्रे त्रिकोणवृत्तचतुरस्रबिंबं सिंदूरादिना विलिख्य तत्र त्रिपादिकामारोप्य फडिति
अर्घ्यं प्रक्षाल्य त्रिपादिकोपरि संस्थाप्य॥ नमइति मंत्रेण गंधपुष्पादीन् तद्वर्गादि तत्र निक्षिप्य
जलेन पूजयेत्॥ ततः ॐ गंगे च यमुने चैव गोदावरि सरस्वति॥ नर्मदे सिंधु कावेरि जलेस्मि
न्सन्निधिं कुरु॥ इति सृण्या तीर्थान्यावाह्य [illegible] वं जलमंत्रं अष्टधा जप्त्वा धेनुमुद्रां प्रदर्श
येदिति सामान्यार्घ्यः॥ अथ विशेषार्घ्यः॥ आत्मदेवतयोर्मध्ये सामान्यार्घ्यजलेन त्रिकोणवृ
त्तषट्कोणचतुरस्रमण्डलं कृत्वा॥ ॐ [illegible] आधारमण्डलाय नमः इति संपूज्य तत्र त्रिपादिकां
संस्थाप्य ॐ मं वह्निमण्डलाय धर्मप्रददशकलात्मने श्रीसदाशिवार्घ्याधाराय नमः इति सं
पूज्य॥ यं धूम्रार्चिषे नमः॥ रं ऊष्मायै• लं ज्वलिन्यै• वं ज्वालिन्यै• शं विस्फुलिंगिन्यै• षं सुश्रियै•
सं सुरूपायै• हं कपिलायै• ळं हव्यवाहायै• क्षं कव्यवाहायै• इति दशकलाः समावाह्य ततो ॐ
मंत्रेण स्वर्णादिनिर्मितं [illegible] संस्थाप्य॥ ॐ अं सूर्यमण्डलायार्घ्यप्रदद्वादशकलात्मने श्री
सदाशिवार्घ्यपात्राय• इति तत्पात्रं संपूज्य॥ कं भं तपिन्यै• खं बं तापिन्यै• गं फं धूम्रायै• घं पं
मरीच्यै नमः॥ ङं नं ज्वलिन्यै नमः॥ चं धं रुच्यै• छं दं सुषुम्नायै• जं थं भोगदायै• झं तं विश्वायै•
ञं णं बोधिन्यै• टं ढं धारिण्यै• ठं डं क्षमायै• इति द्वादशकलाः समावाह्य पूजयेत्॥ ततः॥

१६ खंलं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं
ॡं लृं ॠं ऋं ऊं उं ईं इं आं अं इति संहारमातृकां सविंदुकां जप्त्वा मूलमंत्रं त्रिवारं जपन् पूरये
त्।। ॐ हुं सोममण्डलाय कामप्रद षोडशकलात्मने श्रीसदाशिवार्घ्यामृतायनमः इति संपू
ज्य।। अं अमृतायै० आं मानदायै० इं पूषायै० ईं तुष्ट्यै नमः।। उं पुष्ट्यै० ऊं रत्यै० ऋं धृत्यै० ॠं
शशिन्यै० लृं चन्द्रिकायै० ॡं कान्त्यै० एं ज्योत्स्नायै० ऐं श्रियै० ओं प्रीत्यै० औं अंगदायै० अं
पूर्णायै नमः।। अः पूर्णामृतायै नमः।। इति षोडशकलाः समावाह्य क्रोडं लंकुशमु
द्रया सूर्यमण्डलात्तीर्थमावाह्य।। मूलमंत्रेण तदर्घ्ये जले संयोज्य स्वहृदयादेवता तु
त्वावाह्य हुं इत्यवगुंठ्य वषडिति गालिनी मुद्रां प्रदर्श्य मत्स्यमुद्रया आच्छाद्य मूलमं
त्रेण वौषडिति तज्जलं वीक्ष्य षडंगमंत्रैः सकलीकृत्य गंधपुष्पाभ्यां नमः इति तन्त्र देवतां
संपूज्य तदुपरि चामृतस्य मुद्रया आच्छाद्य मूलमंत्रं अष्टधा जपेत्।। ततो वौमिति मंत्रेण धे
नुमुद्रां प्रदर्श्य अस्त्राय फडिति संरक्ष्य तस्मात् किंचित् जलं प्रोक्षणीपात्रे निधा
य तेनोदकेनात्मानं पूजोपकरणं च मूलेनाभ्युक्षयेत्।। ।।इति विशेषार्घ्यस्थापनम्
अथ पाद्यार्थं अर्घ्यार्थं आचमनीयार्थं च त्रीणि पात्राणि स्थापयेत्।। तथा करणे १६

दौर्वल्यादेकमेकं प्रशस्यते।। पाद्यपात्रे लवंगो१ क्षीर२ चंदन३ नागकेसर४ कुंकुमानि।।
क्षिपेत्।। अर्घ्यपात्रे कुशाग्र१ दूर्वा२ विष्णुक्रांता३ कर्पूर४ चन्दन५ श्वेतसर्षपान् नि
क्षिपेत्।। आचमनपात्रे।। कर्पूरै लालवंग तज पत्रं निक्षिपेत्।। ।।ततः लिंगतो भद्रम
ण्डलस्य मध्य कमल कर्णिकायां आधारं संस्थाप्य ॐ मं वह्निमण्डलाय धर्मप्रद द
शकलात्मने नमः इति संपूज्य तत्रैव वह्निकलाः पूजयेत्।। यं धूम्रार्चिषे नमः१ रं ऊष्मायै०
लं ज्वलिन्यै० वं ज्वालिन्यै० शं विस्फुलिंगिन्यै० षं सुश्रियै० सं सुरूपायै० हं कपिलायै० ळं हव्य
वाहायै० क्षं कव्यवाहायै० इति।। ततः स्वर्णादिनिर्मितं कुंभं फडिति प्रक्षाल्य चं
दनागरु कर्पूरैः धूपयित्वा त्रिगुणेन तंतुना संवेष्ट्य ॐ कुंभायनमः इति गंधपुष्पाभ्यां सं
पूज्य विष्टरान्तर्नवरत्नानि च निक्षिप्य प्रणवमुच्चरन् कुंभं पिण्डयोरैक्यं विभावयन्
मध्ये स्थापयेत्।। ततः कुंभे ॐ अं सूर्यमण्डलाय अर्थप्रद द्वादशकलात्मने नमः इति सं
पूज्य कं भं तपिन्यै नमः।। खं बं तापिन्यै० गं फं धूम्रायै० घं पं मरीच्यै० ङं नं ज्वलिन्यै० चं धं
रुच्यै० छं दं सुषुम्णायै० जं थं भोगदायै० झं तं विश्वायै० ञं णं बोधिन्यै० टं ढं धारिण्यै नमः
ठं डं क्षमायै नमः।। इति सूर्यस्य द्वादशकलाः संपूज्य ततस्तीर्थोदकेन सुवासितजलेन

वा॰ विलोममातृकां पठन्न्यसेत्॥ ह्लं लं क्षं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं
१७ ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं लृं ॠं ऋं ऊं उं ईं इं आं अं इति॥ ततः ॐ सोममण्ड
लाय कामप्रदषोडशकलात्मने नमः इति संपूज्य॥ अं अमृतायै॰ आं मानदायै॰ इं पूषायै॰
ईं तुष्ट्यै॰ उं पुष्ट्यै॰ ऊं रत्यै॰ ऋं धृत्यै॰ ॠं शशिन्यै॰ लृं चन्द्रिकायै॰ ॡं कान्त्यै॰ एं ज्योत्स्नायै॰
ऐं श्रियै॰ ओं प्रीत्यै॰ औं अंगदायै॰ अं पूर्णायै॰ अः पूर्णामृतायै॰ [redacted] इति सोमस्य
षोडशकलाः संपूज्य॥ ततः कलशं गंगेत्यादि सूर्यमण्डलादिकुशमुद्रया तीर्थान्यावाह्य॥
कुंभे नवरत्नानि पंचरत्नानि वा निक्षिप्य ततोऽश्वत्थवटचूतवटबकुलपनसपक्कपल्लवैः क
ल्पवृक्षवत् कुर्यात् कुंभवक्त्रं पिधाय तस्मिन् प्रस्थतोयग्राहि पात्रं सफल[redacted] तं कल्पवृक्षं फल
कुर्यात् संस्थाप्य कुंभे निर्मलेन तोयेन संवे[redacted]ष्टयेत्॥ कलशोपरि पीठपूजां शिवस्य
कुर्यात्॥ यथा॥ मं मंडूकाय नमः॥ कां कालाग्निरुद्राय नमः॥ आं आधारशक्त्यै॰ कुं कूर्मा
य॰ धं धरायै॰ सुं सुधासिन्धवे॰ रं रत्नद्वीपाय॰ सुं सुरांघ्रिपे॰ मं मणिहर्म्याय॰ हें हेमपीठाय॰
पीठपादेषु॥ धं धर्माय॰ ज्ञां ज्ञानाय॰ वैं वैराग्याय॰ ऐं ऐश्वर्याय॰ पीठगात्रेषु॥ अं अधर्मा
य॰ अं अज्ञानाय॰ अं अवैराग्याय॰ अं अनैश्वर्याय॰ मध्ये अनंताय॰ तं तत्त्वपद्माय॰
आं आनन्दमयकन्दाय॰ सं संविन्नालाय॰ विं विकारमयकेसरेभ्यो॰ प्रं प्रकृतिमयपत्रे १७
भ्या१

भ्यो नमः॥ पं पंचाशद्वर्णकर्णिकायै॰ अं द्वादशकलात्मने सूर्यमण्डलाय॰ उं षोडशकलात्म
ने सोममण्डलाय॰ मं दशकलात्मने पावकमण्डलाय नमः॥ सं सत्त्वाय॰ रं रजसे नमः॥ तं
तमसे॰ आं आत्मने॰ उं अंतरात्मने॰ मं परमात्मने॰ ह्रीं ज्ञानात्मने॰ मां मायातत्त्वाय॰ कं क
लातत्त्वाय॰ विं विद्यातत्त्वाय॰ पं परतत्त्वाय॰ इति देवताः॥ अथ पीठशक्तीः पूजयेत्॥
पूर्वादिक्रमेण वामायै॰ ॐ ज्येष्ठायै॰ ॐ रौद्र्यै॰ ॐ काल्यै॰ कलविकरिण्यै॰ बलविकरि
ण्यै॰ बलप्रमथिन्यै नमः सर्वभूतदमन्यै॰ मनोन्मन्यै नमः॥ इति पीठशक्तीः पूज
यित्वा॥ प्र[redacted]तिमायाः प्राणप्रतिष्ठां कुर्यात्॥ ॥तत्र स्वर्णनिर्मिता शिवप्रतिमा
रजतमयनंदिकेश्वरोपरि स्थितां कारयित्वा॥ अग्न्युत्तारणं कुर्यात्॥ तत्र क्रमः
स्वर्णादिशलाकया प्रतिमां मधुसर्पिर्भ्यां समभ्यज्य इमं मे गंगे इति पुरुषसूक्तेनाभ्युक्ष्य
पंचगव्ये एकीकृत्य हौं इति मंत्रेण [redacted] अघोत्तरशतमभिमंत्र्य तत्र प्रतिमां प्रणवेन नि
पेत्॥ ततः त्रिकाष्ठ्य अग्निसूक्तेन प्रतिमाया जलधारां कुर्यात्॥ तत्राग्निसूक्तं कात्यायना
नां लिख्यते॥ हिमस्य त्वा जरायुणाग्ने परिव्ययामसि पावको अस्मभ्यं शिवो भव उपज्म
न्नुप वेतसेऽवत्तरं नदीष्वा अग्ने पित्तमपामसि मंडूकि ताभिरागहि सेमन्नो प[redacted]

१८ दिव्ययामसिपावक॥ अस्मभ्यं शिवो भव॥ उपज्मन्नुपवेतसेवतरं नदीष्वा॥ अग्ने पित्त
मपामसि मण्डूकि ताभिरागहि॥ सेमन्नो यज्ञं पावकवर्णं शिवं कृधि॥ आयामि दन्यप
नं समुद्रस्य निवेशनम्॥ अन्यांस्ते अस्मभ्यं भवन्तु हेतयः॥ पावको अस्मभ्यं शिवो भ
व॥ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया॥ आदेवान्वक्षि यक्षि च स नः पावक दीदि
वाग्ने देवांहं इहावह उपयज्ञं हविश्च नः॥

ततः उद्धृत्य शुद्धजलेन प्रक्षाल्य॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्र
चोदयात्॥ इति मन्त्रेण पयो दधि घृत तैलेक्षुरस कस्तूरी कुंकुम चन्दनाम्भोभिः प्रत्ये
कं स्नापयेत्॥ ततः अष्टभिः कलशैः कर्पूरादिसुवासितैः स्नापयेत्॥ पुनरुत्थाप्य वा
ससा जलमुत्तोल्य कलशोपरि चन्दनादिलिप्तां प्रतिमां स्थापयित्वा कुशाग्रेण स्पृष्ट्वा
ष्टधा गायत्रीं जपेत्॥ ~~दिव्यार्घ्यजलेन प्रतिमां~~ प्रोक्षयेत्॥ ततः अनामिकाङ्गुष्ठयोगे
न प्रतिमां धृत्वा प्राणप्रतिष्ठां कुर्यात्। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं लं क्षं हंसः सोऽहम्॥ १८

हस्ते पुष्पादि गृहीत्वा मूलाधारात् कुण्डलिनीमुत्थाप्य षट्चक्रभेदक्रमेण हृदयकमलात् स्वेष्ट
देवतां तेजोरूपां ब्रह्मरन्ध्रं नीत्वा परमात्मतत्त्वे परमात्मनि संयोज्य शिवशक्त्यात्मकं तत्तेजः
वहन्नासाध्वना करस्थपुष्पाञ्जलौ निःसार्य पुरःस्थितमूर्त्तेः शिरसि पुष्पाञ्जलिं निक्षिपेत्॥
आत्मसंस्थमजं शुद्धं त्वामहं परमेश्वरं॥ अरण्यामिव हव्याशं मूर्तौ वावाहयाम्यहम्॥
आयाहि भगवन्शम्भो शर्व त्वं गिरिजापते॥ प्रसन्नो भव देवेश नमस्तुभ्यं हि शंकर॥
मूलेनावाहनं॥ तवेयं महिमामूर्त्तिस्तस्यां त्वां सर्वगं शिव॥ भक्तिस्नेहसमाकृष्टं दीपवत्स्था
पयाम्यहम्॥ देवेश भ[illegible] सार्द्धं वरणसंयुत॥ यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थि
रो भव॥ ततो मूलेन प्रतिष्ठा[illegible] इति संस्थाप्य संनिधापनं कुर्यात्॥ अनन्या
त्व देवेश मूर्त्तिशक्तिरियं प्रभो [illegible]न्निध्यं कुरु तस्यां त्वं भक्तानुग्रहतत्पर॥ ततो मू
लमुच्चार्य शिव इह सन्निधेहि॥ सन्निधापनं कृत्वा सन्निरोधनं कुर्यात्॥ आज्ञया तव
देवेश कृपाम्भोधे गुणाम्बुधे॥ आत्मानन्दैकतृप्तं त्वां निरुणध्मि जगद्गुरो॥ मूलान्ते श्रीशि
व इह सन्निरुध्यस्व॥ ततः संमुखीकरणम्॥ अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात्साधनस्य
च॥ यदपूर्णं भवेत्कृत्यं तदप्यभिमुखो भव॥ शिव इह संमुखो भव॥ ततः अवगुण्ठनम्

घुते

१९ अमृतत्वाघ्राणश्चक्षुःश्रोत्रइरापितस्मो॥ स्वतेजःपंजरेणाशु वेष्टितो भव सर्वतः॥ मूलं ते
श्रीशिव अवगुंठितो भव२॥ ततः षडंगेन सकलीकरणम्॥ मूलेन धेनुमुद्रयामृतीकर
णम्॥ मूलेन महामुद्रया परमीकरणम्॥ ततः मूलमुच्चार्य ऐं वद वद वाग्वादिनि ऐं। क्लीं
क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु२ क्लीं सौः मोक्षं कुरु२ सौः। ह्रीमिति दीपिनी अकारादि
क्षकारांतां मातृकां चोच्चार्य अर्घ्योदकेन देवं त्रिः प्रोक्ष्य अनामिकांगुष्ठयोगेन प्रतिबोध्य
त्वा प्राणप्रतिष्ठां कुर्यात्॥ स्वाप्य॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं हंसः सोहं अ
स्यां मूर्तौ श्रीशिवस्य प्राणा इह प्राणाः॥ ॐ आं० अस्यां मूर्तौ श्रीशिवस्य जीव इह स्थितः
ॐ आं० अस्यां मूर्तौ श्रीशिवस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणाः इहागत्य
सुखं चिरं तिष्ठंतु स्वाहा॥ इति॥ विश्वेश्वर महाराज प्रियेश्वर प्रजापते॥ आसनं दिव्यमीशा
न दास्येऽहं परमेश्वर॥ ॐ नमो भगवते सकलगुणात्मकशक्तियुक्ताया नंताययोगपी
ठात्मने नमः नमः शिवाय इति आसनं दत्वा॥ महानन्दमयेशान महदानन्ददायक॥ पाद्यं
गृहाण देवेश पार्वतीपरमेश्वर॥ मूलेन पाद्यम्॥ त्र्यंबक सदा घोर विपदां विदारक॥
अर्घ्यं गृहाण देवेश भो सर्वार्थसाधक॥ मूलेनार्घ्यः॥ त्रिपुरांतक दीनार्तिनाशि नश्रीकंठ १९

मूलध्वक॥ गृहाणाचमनं चारु पवित्रोदककल्पितम्॥ मूलेनाचमनम्॥ सर्वकालुष्यही
नाय परिपूर्णसुखात्मने मधुपर्कमिमं देव कल्पयामि प्रसीद मे॥ इति घृतमध्वाज्ययुक्तं म
धुपर्कं मूलेन दद्यात्॥ आचमनं च दद्यात्॥ ततः पंचामृत स्नानं॥ मूलेन शुद्धोदकस्ना
नं पुनर्मूलेनाचमनम्॥ ततः श्वेतवस्त्रं॥ कालाग्निरुद्र वरद वरदाभयदायक॥ वस्त्रं गृहाण
देवेश दिव्यं गंधोपपादितम्॥ मूलेन वस्त्रं पुनराचमनं॥ यज्ञोपवीतं परमं पवित्रं विधिनिर्मि
तम्॥ नीलकंठोपवीतं च मया दत्तं गृहाण भो॥ मूलेन यज्ञोपवीतम्॥ स्वभावसुंदरांगाय
नानाशक्त्याश्रयाय ते॥ भूषणानि विचित्राणि कल्पयाम्यमरार्चित॥ इति भूषणानि॥
चंदनागरुकर्पूरं तमालजलकुंकुमम्॥ कस्तूरीकुष्ठसंयुक्तं गंधं वै गंधाष्टकं विदुः॥ मूलेन
गंधं॥ सदाशिव शिवानंद प्रचेतानूपरमेश्वर॥ गृहाण त्वमुमाकान्त दयां कृत्वा ममोपरि
॥ इत्यक्षताः॥ पुष्पाणि च विचित्राणि मालत्यादीनि वै प्रभो हृद्यानि च सुगंधानि बिल्वप
त्रं गृहाण मे॥ मूलेन बिल्वपत्रं॥ तर्जन्यंगुष्ठयोगेन पुष्पमुद्रया मूलेन श्रीशिवाय वौष
डिति पंच पुष्पांजलीन् दत्वा आवरणपूजार्थमनुज्ञाप्य आवरणपूजां कुर्यात्॥ ॥
प्रथमे षट्दले दिग्दलेषु पूर्वदलमारभ्य पीतप्रभं चतुर्वक्त्रं प्रधानसहस्रांशु धाय ॐ नं तत्पुरुषा

२० यनमः॥दक्षिणे अंजनप्रभायचतुर्वक्त्रायप्रधानसदृशायुधाय ॐ मं अघोरायनमः॥ पश्चिमे
श्वेतप्रभायचतुर्वक्त्रायप्रधानसदृशायुधाय ॐ शिं सद्योजातायनमः॥ उत्तरे रक्तप्रभायच
तुर्वक्त्रायप्रधानसदृशायुधाय ॐ वां वामदेवायनमः॥ मध्ये शुद्धस्फटिकसंकाशायचतुर्वक्त्राय
प्रधानसदृशायुधाय ॐ यं ईशानायनमः॥ आग्नेयादिविदिग्दलेषु प्रादक्षिण्येन॥ ॐ तेजो
रूपायै निवृत्त्यै नमः॥ ॐ तेजोरूपायै प्रतिष्ठायै॰ ॐ तेजोरूपायै विद्यायै॰ ॐ ते॰ शांत्यै॰ मध्ये ॐ
शांत्यतीतायै नमः इति प्रथमावरणं॥ अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भक्त्या समर्प्प
ये तुभ्यं प्रथमावरणार्च्चनम्॥ इति प्रार्थयेत्॥ एवमग्रेपि॥ द्वितीयाष्टदलांतः केसरेषु आग्नेय्या
दिक्रमेण॥ नं हृदयाय नमः॥ मः शिरसे स्वाहा॥ शिं शिखायै वषट्॥ वां कवचाय हुम्॥ यं नेत्रत्र अग्रे ८
याय वौषट्॥ नमः शिवाय अस्त्राय फट्॥ अग्न्यादिचतुर्दिक्षु॥ अभीष्टसिद्धिं मे॰॥ द्वितीये ष्टद
ले देवाग्रदलमारभ्य प्रादक्षिण्येन॥ रक्तप्रभाय पद्मस्थाय चन्द्रशेखराय भूषणान्विताय त्रिने
त्राय शूलवज्रास्त्रचापहस्ताय अनंताय नमः॥ पूर्वे॥ पीतप्रभाय पद्मस्थाय चन्द्रशेखरा
य भूषणान्विताय त्रिनयनाय शूलवज्रास्त्रचापहस्ताय सूक्ष्माय नमः॥ शितप्रभाय पद्म
स्थाय चन्द्रशेखराय भूषणान्विताय त्रिनयनाय शूलवज्रास्त्रचापहस्ताय शिवोत्तम॥ २०

१ एकनेत्राय नमः॥ कृष्णप्रभाय पद्म॰ एकरुद्राय॰ रक्तप्रभाय पद्म॰ त्रिमूर्त्तये॰ अंजनप्रभाय पद्म॰

य नमः॥ आरक्तप्रभाय पद्मं॰ श्रीकंठाय नमः॥ असितप्रभाय पद्म॰ शिखंडिने नमः इति संपूज्य॥
अभीष्टसिद्धिं मे देहीति॰ तृतीयाष्टदले देवस्य उत्तरादि प्रादक्षिण्येन॥ स्वर्णवर्णायै उमायै १॥ जलव
र्णाय [illegible] चण्डेश्वराय २॥ अरुणप्रभाय नन्दिने नमः॥ श्यामप्रभाय महाकालाय नमः॥ ४ मुक्ता
प्रभाय गणेशाय नमः॥ चन्द्रप्रभाय वृषभाय॰ ६॥ सितप्रभाय भृंगिरिटये नमः॥ ७ पाटलप्रभा
य स्कन्दाय नमः इति चतुर्थावरणं॥ अभीष्टसिद्धिमिति॥ चतुरस्ररेखात्रयान्तरालगतवीथ्यां
यथास्थित पूर्वादिदिक्षु मारभ्य॥ लं इन्द्राय नमः॥ अग्नये॰ यमाय॰ नैर्ऋतये॰ वरुणाय॰ वायवे
नमः॥ कुबेराय॰ ईशानाय॰ पूर्वेशानयोर्मध्ये ब्रह्मणे नमः॥ निर्ऋतिवरुणयोर्मध्ये अनंताय नमः॥
इति संपूज्य अभीष्टेति पंचमावरणं॥ द्वितीयवीथ्यां॥ वज्राय॰ शक्तये॰ दण्डाय॰ खड्गाय॰ पा
शाय॰ अंकुशाय॰ गदायै॰ त्रिशूलाय॰ पूर्वेशानयोर्मध्ये पद्माय॰ निर्ऋतिवरुणयोर्मध्ये चक्राय
नमः इति संपूज्य अभीष्टेति प्रार्थयेत्॥ इति षष्ठावरणं॥ ततः मूलमुच्चार्य सांगाय सपरि
वाराय सा॰ शक्तिकाय सायुधाय पुष्पांजलिं समर्पयामि नमः॥ इति पुष्पांजलिं समर्प्य धू
पादिना पूजयेत्॥ महादेव मृडानीश जगदीश निरंजन॥ धूपं गृहाण देवेश साज्यं गुग्गुलक
ल्पितम्॥ वनस्पतिरसेति पठित्वा मूलेन धूपमुद्रया धूपं दद्यात्॥ तर्जन्यंगुष्ठयोगेन धूपमुद्रा

२१ हिरण्यबाहो सेनान्य ईशानाशापते प्रभो॥ दीपं गृहाण कर्पूरकपिलाज्यत्रिवर्तिकम्॥ आज्यं त्रिवर्तिसं
युक्तमिति दीपं॥ मध्यमां गुष्ठयोगेन दीपमुद्रा॥ अन्तानामपि सर्वेषां पतक्षीनार्त्तिनाशक॥ षड्रसैश्च
समायुक्तं गृहाणान्नं निवेदितम्॥ निवेद्य गन्धतां देवे ति पठित्वाऽमृतोपस्तरणमसि प्राणाय स्वाहेत्या
द्युक्त्वा॥ नमस्ते देवदेवेश सर्वतृप्तिकरं वरम्॥ अन्नानि वेदितं भुंक्ष्व प्रकृतिस्थं सुशीतलम्॥ परमा
नन्दसंपूर्ण गृहाण जलमुत्तममिति मध्ये पानीयं दत्वा॥ ब्रह्मरुद्रेश्वरि पठेत्॥ ब्रह्मेन्द्राद्यैः परितगुरु
भिः सूपविष्टैः समेतो गौर्य्यासिंजद्वलयकरयासादरं वीज्यमानः॥ नर्म्मक्ष्वेली प्रहसनमुखे हासयन्
पंक्तिभोक्तॄन् भुंक्ते पात्रे कनकघटिते षड्रसं पार्वतीशः॥१॥ शालीभक्तं सुभक्तं शिशिरकरसितं
पायसापूपसूपं लेह्यं पेयं चचोष्यं सितममृतफलं षड्रसा ढ्यंसस्वाद्यम्॥ आज्यं प्राज्यं समाज्या
नयनरुचिकरं राजिको ल्या मरीचस्वादीयः शाकराजीपरिकरममृताहारजोषज्जुषस्व॥२॥
इति पठित्वा यथाशक्ति जपित्वा तत्रापोशानं च दत्वा नैवेद्यशेषं निर्माल्यभोजिने चुलेश्वराय स
मर्प्य सुगंधि चन्दनेन करोद्वर्त्तनं कारयित्वा मल्लेनाचमनं च दत्वा॥ राजाधिराज देवेश निराको
र निरास्पद॥ फलं गृहाण देवेशानारिकेलादिकं शुचि इत्यनेन फलं दद्यात्॥ इदं फलमिति मल्
लेनच॥ शाश्वत श्रीमयानंदमदनांतकधूर्जटे॥ गृहाण पूगतांबूल दलचेर्णं सखादिरम्॥

पूगीफलमिति मल्लेन ताम्बूलं दद्यात्॥ हिरण्यगर्भगर्भस्थमिति दक्षिणां दद्यात्॥ ततः पुष्पांजलिं दद्या
त्॥ हर विश्वाखिलाधार निराधार निराश्रय॥ पुष्पांजलिमिमं शंभो गृहाण वरदायक इति पुष्पांजलिं
दत्वा नीराजनं कुर्यात्॥ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च॥ त्वमेव सर्वज्योतींषि आर्त्तिक्यं प्र
तिगृह्यताम्॥ शालिपिष्टोद्भवैः शुद्धैर्घृतपूर्णैः समुज्ज्वलैः ततो नीराजनं दीपैः षड्भिः शास्त्रानुकारयेत्
सर्षपैर्दधियुक्तैश्च दूर्वागोरोचनाक्षतैः॥ शातकुंभं ततः पद्ममष्टपत्रं सकर्णिकम्॥ ध्यात्वातिवेद
येन्मूर्द्ध्नि शिवस्य कुसुमैः सह॥ ततो वस्त्रयुगं चामरदर्पणादीन्यर्पयेत्॥ ततः प्रादक्षिणां कृत्वा
साष्टांगं प्रणमेत्॥ मृडानीनाथ मे सर्वान् पराधानने क्षमा॥ नमस्ते भिप्रणामं ते कोम्पयोग
सम्भवमिति॥ नमस्कारं कृत्वा ईश्वर वेद्यां अष्टदिक्षु यथास्थितपूर्वादिक्रमेणाष्टमूर्त्ति पूजनं कुर्यात्
यथा शिवाय क्षितिमूर्त्तये नमः॥ भवाय जलमूर्त्तये० रुद्राय अग्निमूर्त्तये नमः॥ उग्राय वायुमूर्त्तये
भीमाय आकाशमूर्त्ते० पशुपतये यजमानमू० महादेवाय सोममू० ईशानाय सूर्य्यमू० मध्ये शि
वाय० चंदनादि पंचोपचारैः संपूज्य यथाशक्ति जप्त्वा स्तोत्रैः स्तुत्वा नमस्कुर्यादिति मुख्यदेवतार्च
नम्॥ ॥अथ सर्वतोभद्रमण्डलरचनं॥ मण्डपस्याग्नेयकोणे वेदिकां कृत्वा मण्डलं कुर्यात्॥
यथा॥ प्रागुदीचीगता रेखाः कुर्याद्वैकोनविंशतिः॥ खण्डेन्दुस्त्रिपदः कोणे शृंखला पंचभिः पदैः
एकादशपदा वल्ली भद्रं तु नवभिः पदैः॥ चतुर्विंशत्पदा वापी परिधिर्विंशतिपदैः॥ मध्ये षोडशभिः

पद्मासनस्थं जटिलं ध्यानस्थंच चतुर्मुखं दण्डकमण्डलुस्रक्
स्रुवस्तकहस्तं॥

२२ कोष्ठः पद्ममष्टदलंस्मृतम्॥ श्वेतेन्दुःशृंखला कृष्णा वल्ली नीलेन पू●रयेत्॥ मध्यारूद्रा सिता वापी
परिधिः पीतवर्णकः॥ बाह्यांतरदलाः श्वेताः कर्णिका पीतवर्णिका॥ परिध्या वेष्टितं पद्मं बाह्ये
स●त्वरजस्तमः॥ इति मण्डलं विलिख्य तत्र देवताः पूजयेत्॥ तत्र कर्ता आचम्य श्रीसदाशिवे
हवनांगभूतसर्वतोभद्रमण्डलदेवतास्थापनं करिष्ये इति संकल्प्य मध्ये ब्रह्मणे नमः॥ ब्रह्माणं
सांगं सायुधं सपरिवारं सशक्तिकं सवाहनं आवाहयामि स्थापयामि पूजयामि नमः॥ उत्तरे सो
मायनमः॥ गदावरपाणिं श्वेताश्वरथवाहनं श्वेतपद्मासनस्थं सोमं आवा०॥ ईशान्यां ईशानाय
नमः॥ शुद्धस्फटिकसंकाशं शूलखट्वांगभयवरदम्॥ ईशानं सांगं आ०॥ पूर्वे इन्द्रायनमः॥ वज्रां
कुशबाणचापहस्तं रक्तवर्णं गजारूढं इन्द्रं सांगं०॥ आग्नेय्यां॥ अग्नयेनमः॥ वराभयस्रुक्स्रुव
हस्तं स्वर्णवर्णं त्रिपदं अग्निं सांगं०॥ दक्षिणे यमाय०॥ पाशदण्डधरं रक्तं महिषारूढं यमं सांगं०
नैर्ऋत्यां निर्ऋतये नमः॥ निर्ऋतिं खड्गचर्मधरं रक्तं नरवाहनं सांगं०॥ पश्चिमे वरुणाय०
नागपाशधरं नक्रवाहनं पश्चिमीशं वरुणं सांगं०॥ वायव्यां वायवे नमः॥ मृगवाहनं खड्गचर्मदंडां
कुशहस्तं वायुं सांगं०॥ वायुसोममध्ये भद्रपदे वसून् वरदाभयहस्तान् सांगान्० तत्राष्टवसु
नामानि॥ ध्रुवः १ अध्वरः २ सोमः ३ आपः ४ अनिलः ५ अनलः ६ प्रत्यूषः ७ प्रभासः ८॥ सोमेशा
नयोर्मध्ये भद्रपदे एकादशरुद्रान् वृषभारूढान् वरदाभयपाणिनः सांगान् आवाहयामि० २२

वीरभद्रं आवा० शंभुमा० गिरिशं० महायशसं० अजैकपादं० पिनाकिनं० अहिर्बुध्न्यं० कपा
लिनं० विशांपतिं० भर्गं० भुवनाधीशं०॥ ईशानेन्द्रयोर्मध्ये भद्रपदे द्वादशादित्यान् पद्महस्ता
न् पद्मवर्णान् सांगान्० तत्र॥ वरुणं आ० सूर्यं० वेदांगं० भानुं० इन्द्रं० रविं० गभस्तिनं० य
मं० स्वर्णरेतसं० दिवाकरं० मित्रं० विष्णुं०॥ इन्द्राग्न्योर्मध्यगतभद्रपदे॥ अश्विनौ औषधीपुस्त
कोपेतौ रत्नभाण्डकरं डकौ सांगौ० अग्नियमयोर्मध्ये विश्वान् देवान् सांगान्०॥ यमनिर्ऋतिम
ध्यभद्रपदे सप्तयक्षान् सांगान्०॥ निर्ऋतिवरुणयोर्मध्यभद्रपदे सर्पान् सांगान्०॥ वरुण
वायव्ययोर्मध्यभद्रपदे गंधर्वान् अप्सरसः सांगाः आ०॥ ~~[illegible]~~
ब्रह्मसोममध्ये उत्तरवाप्यां॥ रुद्रं शूलमहाकालस्कंदं नंदीश्वरान्॥ ब्रह्मेशानमध्यस्थशृंख
लायां दक्षान् सप्त अदितिं च आ०॥ ब्रह्मेन्द्रगतमध्यवाप्यां दुर्गां सांगां शक्तिबाणशूलखट्वांगकपा
ल●खेटकचक्रटंकपरशुहस्तां आ०॥ तत्रैव विष्णुं शंखचक्रगदापद्महस्तं गरुडासनं सांगं आ०
ब्रह्माग्नेयमध्यस्थशृंखलायां स्वधां पितृंश्च आ०॥ ब्रह्मयममध्यवाप्यां मृत्युरोगं सांगं० ब्रह्म
निर्ऋतिमध्यस्थशृंखलायां गणपतिं सांगं०॥ ब्रह्मवरुणमध्यस्थवाप्यां अपः सांगाः०॥ ब्रह्मवायु
मध्यस्थशृंखलायां मरुतः सांगान् आ०॥ ब्रह्मणः पादमूले कर्णिकायां अधः मेरुं सांगं० तत्रैव

२३ गंगादिनदीः॥ सप्तसमुद्रान्॥ क्षारक्षीरदधिसर्पिः इक्षुस्वादुरसोदकान्॥ तत्रैव मेरुं सोमं०॥ सो
मादिसमीपे उत्तरमारभ्य प्राग्दक्षिणेन॥ गं गदायै नमः॥ गदां आवाहयामि स्थापयामि पूजयामि न
मः॥ त्रिशूलाय नमः त्रिशूलं०॥ वज्रं० शक्तिं० दण्डमा० खड्गमा० पाशमा० अंकुशमा०॥ सो
मसमीपे वायव्ये॥ गों गौतमाय नमः गौतममा० ईशान्ये भं भरद्वाजाय० भरद्वाजं० पूर्वे विं विश्वामित्रा
य० विश्वामित्रमा०॥ आग्नेय्यां॥ कं कश्यपाय नमः कश्यपमा०॥ दक्षिणे॥ जं जमदग्नये नमः जम
दग्निमा०॥ नैर्ऋते॥ वं वशिष्ठाय नमः वशिष्ठमा०॥ पश्चिमे॥ अं अत्रये नमः अत्रिमा०॥ वायव्ये॥
अं अरुंधत्यै नमः अरुंधतीमा०॥ पूर्वादिक्रमेण॥ ऐं ऐंद्र्यै नमः ऐंद्रीमा०॥ कौमारीमा० ब्रां ब्राह्म्यै
नमः ब्राह्मीमा० वां वाराह्यै नमः वाराहीमा० चां चामुण्डायै नमः चामुण्डामा० वैं वैष्णव्यै नमः
वैष्णवीमावाहयामि०॥ मां माहेश्वर्यै नमः माहेश्वरीमा० वैं वैनायिक्यै नमः वैनायिकीमा०॥
इत्यष्टौ शक्तयः॥ ॥ एतास्तत्तन्मंत्रैर्नाममंत्रैर्वा स्थापयेत् पूजयेत् प्रत्येकं दशदशतिलाज्या
हुतीर्जुहुयात्॥ उपहारं बलिं निवेदयेत्॥ ॥ अथ वास्तुपूजायामावश्यकत्वाद्वास्तुमण्डलं त
द्देवताश्च लिख्यंते॥ अत्र मात्स्ये॥ यज्ञोत्सवादौ च बलिस्तु वाहारो भविष्यति॥ वास्तुपूजामकु
र्वाणस्तवाहारो भविष्यतीति॥ ज्ञानरत्नावल्यां॥ चतुःषष्टिपदं वास्तुदेवानां परमं हितं॥ २३

एकाशीतिपदं वास्तुगृहाणां तु प्रकीर्तितम्॥ नित्यं शतपदं दुर्गे नगरग्रामखेटके॥ चतुःषष्टिपद
वास्तुप्रकारस्तत्र जायते यथा॥ ॥ मण्डपे नैर्ऋत्ये वस्त्रे सुवर्णे दिशाकाकया॥ यशोवती कांता
विशाला प्राणवाहिनी सती वसुमती सुमती नन्दा सुभद्रेति प्राग्गायतान् वरेखाः कृत्वा॥ हिरण्या
सुव्रता लक्ष्मीः विभूतिः विमला प्रिया जया काला विशोका चेति नव दक्षिणोत्तरायताः कृत्वा॥
मध्ये कोष्ठचतुष्टयमेकीकृत्य कोणेषु रेखा दत्वा देवता आवाहयेत्॥ मध्यपदचतुष्के हृदये
ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि पूजयामि नमः॥ तत्सन्निहित पूर्वपदद्वये दक्षि
णस्तने अर्यम्णे नमः अर्यमाणमा०॥ दक्षिणपदद्वये जठरदक्षिणे विवस्वते नमः विवस्व
न्तमा०॥ पश्चिमपदद्वये जठरवामे मित्राय नमः मित्रमा०॥ उत्तरपदद्वये वामस्तने पृथ्वीधरा
य नमः पृथ्वीधरमा० आग्नेयपदार्द्धयोर्दक्षिणहस्ते सावित्रसवितृभ्यां नमः सावित्रसविता
रौ आ०॥ नैर्ऋतिपदार्द्धयोर्दक्षिणमेढ्रयोः॥ विबुधाधिपजयाभ्यां नमः विबुधाधिपजयौ आ०
॥ वायव्यपदार्द्धयोर्वामहस्ते राजयक्ष्मरुद्राभ्यां नमः राजयक्ष्मरुद्रौ०॥ ईशानपदार्द्धयोःस्रो
मुखयोरापवत्साभ्यां नमः आपवत्सौ०॥ ईशानपददक्षिणार्द्धे शिरसि शिखिने नमः शिखि
नमावा०॥ तद्दक्षिणसार्द्धपदे दक्षिणनेत्रे पर्जन्याय नमः पर्जन्यमा०॥ तद्दक्षिणपदद्वये दक्षि

२४ श्रोत्रे जयंताय नमः जयंतमा०॥ तद्दक्षिणपदद्वये दक्षिणांशे कुलिशायुधाय नमः कुलिशायुध
मा०॥ तद्दक्षिणपदद्वये दक्षिणबाहौ सूर्याय नमः सूर्यमा०॥ तद्दक्षिणपदद्वये दक्षिणबाहावेव
सत्याय नमः सत्यमा०॥ तद्दक्षिणसार्द्धपदे दक्षिणकूर्परे वृषाय नमः वृषमा०॥ तद्दक्षिणाग्ने
यपदार्द्धे दक्षिणबाहावाकाशाय नमः आकाशमा०॥ तद्दक्षिणाग्नेयपदार्द्धे दक्षिणबाहावेव
वायवे नमः वायुमा०॥ तत्पश्चिमे सार्द्धपदे दक्षिणमणिबंधे पूष्णे नमः पूषाणं आ०॥ तत्पश्चि
मपदद्वये दक्षिणपार्श्वे वितथाय नमः वितथमा०॥ तत्पश्चिमपदद्वये दक्षिणपार्श्वएव गृहक्ष
त्काय नमः गृहक्षत्कमा०॥ तत्पश्चिमपदद्वये दक्षिणोरौ यमाय नमः यममा०॥ तत्पश्चिम
पदद्वये दक्षिणजानौ गन्धर्वाय नमः गंधर्वमा० तत्पश्चिमसार्द्धपदे दक्षिणजंघायां भृंगरा
जाय नमः भृंगराजमा०॥ तत्पश्चिमनैर्ऋत्यपदार्द्धे दक्षिणस्फिचि मृगाय नमः मृगमा०
तदुत्तरार्द्धपदे पितृभ्यो नमः पितृन्मा०॥ तदुत्तरसार्द्धपदे वामस्फिचि दौवारिकेभ्यो नमः दौवा
रिकान्मा०॥ तदुत्तरपदद्वये वामजंघायां सुग्रीवाय नमः सुग्रीवमा०॥ तदुत्तरपदद्वये वाम
जानौ पुष्पदंताय नमः पुष्पदन्तमा०॥ तदुत्तरपदद्वये वामोरौ वरुणाय नमः वरुणमा०॥ त
दुत्तरपदद्वये वामपार्श्वे असुराय नमः असुरमा०॥ तदुत्तरसार्द्धपदे वामपार्श्वे एव शोषाय० २४

शोषमा०॥ तदुत्तरवामपदार्द्धे वाममणिबन्धे पापाय नमः पापमा० तत्प्राक्पदार्द्धे वामप्रबा
मप्रबाहौ वायवे नमः वायुमा०॥ तत्प्राक्सार्द्धपदे वामप्रबाहावेव [illegible] नमः अहिमा०॥ त
त्प्राक्पदद्वये वामकूर्परे मुख्याय नमः मुख्यमा०॥ तत्प्राक्पदद्वये वामबाहौ भल्लाटाय न
मः भल्लाटमा०॥ तत्प्राक्पदद्वये वामबाहावेव सोमाय नमः सोममा० तत्प्राक्पदद्वये वा
मांशे सर्पाय नमः सर्पमा०॥ तत्प्राक्सार्द्धपदे वामश्रोत्रे अदितये नमः अदितिमा०॥ त
त्प्रागर्द्धपदे वामनेत्रे दितये नमः दितिमा०॥ उत्तरे वास्तोष्पतिरिति वास्तुपूजासमाप्ता
॥ ॥ अथ केषांचिन्मतेऽत्र योगिनीपूजनमप्युक्तं। तत्प्रकारस्तु यथा॥ वायव्यदिशि
वेदिकोपरि रक्तवस्त्रे अष्टास्त्राणि त्येकौ पङ्क्तिः॥ एवमष्टौ अस्त्रपङ्क्तीः कृत्वा यथाशो
भं रंजयित्वा नामसमानानामभिरावाह्य सम्पूज्य पायसबलिं दद्यात्॥ ॥मन्त्रः कृष्णवर्णे
भ्रूलदण्डमरूपाशासिधरे सर्वालंकारभूषिते ससैन्ये। जये एह्येहि आवाह्य संपू
ज्य॥ आगच्छेमं बलिं गृह्ण२ ममेप्सितं कुरु२ स्वाहा॥ एवं॥ विजये२ जयंति३ अपरा
जिते४ दिव्ययोगिनि५ महायोगिनि६ सिद्धयोगिनि७ गणेश्वरि८॥ ततः द्वितीयपंक्तौ॥

२५ गौरवर्णे अक्षमालांकुशपुस्तक।वीणाधरे प्रेताशिनि १ एह्येहीत्यादि प्राग्वत्॥ एवं॥ डाकिनि २
कालि ३ कालरात्रि ४ निशाचरि ५ टंकारिणि ६ रुद्रवेतालि ७ हुंकारिणि ८॥ ततस्तृतीयपं
क्तौ॥ रक्तवर्णे ज्वालाशक्त्यभयवरदे ऊर्ध्वकेशि १ एह्येहीत्यादि०॥ एवं विरूपाक्षि २ शुष्कां
गि ३ नरभोजिनि ४ फट्कारिणि ५ वीरभद्रे ६ धूम्राक्षि ७ कलहप्रिये ८॥ ततश्चतुर्थपंक्तौ
विद्युत्सन्निभे ध्वजवाणधनुःपाशमुसलहस्ते १ एह्येहि०॥ एवं रक्ताक्षि २ विश्वरूपे ३
भयंकरि ४ वीरकौमारि ५ चण्डिके ६ वाराहि ७ मुण्डधारिणि ८॥ ततः पंचमपंक्तौ॥ आ
दित्यवर्णे कमलाक्षमालाभयवरदकरे भैरवि १ एह्येहीत्यादि०॥ एवं ध्वांक्षिणि २ धूम्रां
गि ३ प्रेतवाहिनि ४ खड्गिनि ५ दीर्घलंबोष्ठि ६ मालिनि ७ मंत्रयोगिनि ८॥ ततः षष्ठपं
क्तौ॥ सुनीले शंखचक्रगदाभयकरे कालिनि १ एह्येहीत्यादि०॥ एवं चक्रिणि २॥ कंका
लि ३ भुवनेश्वरि ४ त्रोटकि ५ महामारि ६ यमदूति ७ करालिनि ८॥ ततः सप्तमीपंक्तौ॥
तमःपुंजनिभे खड्गखेटकपट्टिशपरशुहस्ते केशिनि १ एह्येहीत्यादि०॥ एवं मर्दिनि २
रोमजंघे ३ निवरिणि ४ विशालि ५ कार्मुकि ६ लोभि ७ अधोमुखि ८॥ ततोऽष्टमपंक्तौ २५

धूम्रवर्णे कुन्तखेटकभिन्दिपालमालाकरे मुण्डाग्रधारिणि १ एह्येहीत्यादि०॥ एवं व्याघ्रि २ कां
क्षिणि ३ प्रेतरूपिणि ४ धूर्जटि ५ घोरे ६ करालि ७ विषलंबिनि ८॥ इति योगिनीपूजा॥
॥एवं सर्वे पूर्वेद्युरधिवासं कृत्वा रात्रौ गीतनृत्यादिना जागरणं कुर्यात्॥ ॥ततः द्वितीयदि
वसे प्रातरेव कृतनित्यक्रियो यजमानः मण्डपमागत्य संस्थाप्य मान्येन इष्टदेवतां संपूज्य आवा
हितदेवानामपि पंचोपचारैः पूजां विधाय स्वगृह्योक्तविधिनाऽऽश्वलायनोक्तविधिना वाग्निं
संस्थाप्य हवनं कुर्यात्॥ तद्यथा आचार्यो द्विवरणं गृहीत्वा विधिना विधाय देशकालौ
संकीर्त्य कृतस्यामुकसंख्याक रुद्रलिंगात्मकस्य वा ब्राह्मणद्वारा कारितस्य दशांशेन हव
नमहं करिष्ये काम्यपक्षे कामनया उल्लेखः कर्तव्यः नो चेत् श्रीपार्वतीपरमेश्वरप्रीत
ये करिष्ये अथवा चतुर्विधपुरुषार्थसिद्धिकामोऽहं करिष्ये॥ लिंगपूजनपक्षे स्वयंकृता
नां ब्राह्मणद्वारा कारितानां वा अमुकसंख्याकलिंगानां समानसंख्याकं तद्दशांशं वा ति
लाज्याकृतिभिर्वा पायसेन केवलेनाज्येन वा हवनं करिष्ये तत्रादावग्निस्थापना
दि कर्माहं करिष्ये॥ इति संकल्प्य॥ मूलेन प्राणायामं षडंगं च कृत्वा॥ यथा॥

५२

कुण्डे स्थण्डिले वा गोमयोदकेनोपलिप्य मूलेनावलोकयेत्॥ अस्त्राय फडिति प्रोक्ष्य कु-
२६ शैः संताड्य हुमिति मुखस्य जलेनाभिषिंचयेत्॥ ततस्तन्मध्ये त्रिकोणं षट्कोणं वृत्तं अष्ट-
दलं भूपुरान्वितं सिंदूरेण हरिद्रया वा विलिख्य वहिश्च यथाक्रमेण रंजयित्वा॥ त्रिको-
णे ॐ ह्रीं ॐ इति लिखित्वा वागीश्वरी वागीश्वरयोः पीठदेवताभ्यो नमः पीठशक्तिभ्यो न-
मः इति पुष्पं दद्यात्॥ वागीश्वरीवागीश्वरयोर्योगपीठात्मने नमः इति तयोरासनं द-
त्वा गंधाद्यैरुपचारैः पूजयेत्॥ ततः सूर्यकान्ताद्वारणितः श्रोत्रियागारतो पि वा पात्रे-
ण पिहितेपात्रेग्निमानीय फडित्यादाय हुं इति उद्घाट्य फडिति नैरृत्यदेशे क्रव्यादां-
शं संत्यज्य मूलेन वह्निं पुरो निधाय मूलेन वीक्ष्य फडिति प्रोक्ष्य कुशैः संताड्य हुं इति मु-
खस्य जलेनाभिषिंच्य परमात्मानलेन जाठरेणाग्निना चैकत्वं विभाव्य रं इति चैतन्यं सं-
योज्य प्रणवेनाभिमंत्र्य वमिति धेनुमुद्रयामृतीकृत्य फडिति संरक्ष्य कुंडस्य वकु-
शुप्रणवं पठन् कुण्डोपरि त्रिर्भ्रामयित्वा जानुस्पृष्टधरातलः मूलमुच्चार्य ॐ हुं व- ९
ह्निचैतन्याय नमः इति मंत्रेण ईश्वरेतो बुद्ध्या वागीश्वरीयोनौ प्रविष्टं विभाव्यामीमु २६

खं स्थापयेत्॥ ततस्तयोराचमनं दत्वा ज्वालिनीमुद्रया॥ चित्पिंगल हन दह पच सर्व-
ज्ञाज्ञापय स्वाहा २४ इति चतुर्विंशत्यर्णेन मनुनाग्निं दर्भादिभिः प्रज्वालयेत्॥ ज्वालिनीमु-
द्रालक्षणं यथा॥ मणिबंधयुतौ कृत्वा प्रसृतांगुलिकौ करौ॥ मध्यमांगुष्ठयुगले मिलित्वो-
त्तः प्रसारिते॥ ज्वालिनी नाममुद्रेयं वैश्वानरप्रियंकरीति॥ ततः अग्निं प्रज्वलितं वंदे जा-
तवेदं हुताशनम्॥ सुवर्णवर्णममलं समिद्धं विश्वतोमुखम्॥ इत्यग्निमुपस्थाय अग्निमंत्र-
स्य ऋष्यादिन्यासं कुर्यात्॥ अग्निमंत्रस्य भृगुऋषये नमः शिरसि॥ गायत्रीछंदसे न-
मः मुखे॥ अग्निदेवतायै नमः हृदये॥ रं बीजाय नमः गुह्ये॥ स्वाहाशक्तये नमः पादयोः॥
स्त्रं हिरण्यायै नमः लिंगे॥ ष्रं गगनायै नमः गुदे॥ श्रं रक्तायै नमः मूर्ध्नि॥ वं कृष्णा-
यै नमः मुखे॥ लं सुप्रभायै नमः नासिकायाम्॥ यं अतिरक्तायै नमः नेत्रयोः॥ यूं
बहुरूपायै नमः सर्वांगे॥ ततः जिह्वानां देवताः न्यसेत्॥ सुरेभ्यो नमः लिंगे॥ पितृ-
भ्यो नमः गुदे॥ गंधर्वेभ्यो नमः मूर्ध्नि॥ यक्षेभ्यो नमः मुखे॥ नागेभ्यो नमः नासिका

२५

२८ यामू॥ पिशाचेभ्यो नमः नेत्रयोः॥ राक्षसेभ्यो नमः सर्वांगे॥ ॐ सहस्रार्चिषे नमः हृदयाँ नमः
ॐ स्वस्तिपूर्णाय शिरसे स्वाहा॥ ॐ उत्तिष्ठपुरुषाय शिखायै वषट्॥ ॐ धूमव्यापिने नमः
कवचाय हुम्॥ ॐ सप्तजिह्वाय नमः नेत्रत्रयाय वौषट्॥ ॐ धनुर्धराय नमः अस्त्रा
य फट्॥ ॐ अग्नये जातवेदसे नमः मूर्ध्नि॥ ॐ अग्नये सप्तजिह्वाय नमः वामांसे॥
ॐ अग्नये हव्यवाहनाय नमः वामपार्श्वे॥ ॐ अग्नये अश्वोदरजाय नमः वामकटौ॥
ॐ अग्नये वैश्वानराय नमः लिंगे॥ ॐ अग्नये कौमारतेजसे नमः दक्षकटौ॥ ॐ अग्न
ये विश्वमुखाय नमः दक्षपार्श्वे॥ ॐ अग्नये देवमुखाय नमः दक्षांसे॥ इति विन्य
स्य ध्यायेत्॥ त्रिनेत्रमारक्ततनुं सुशुक्लवस्त्रो सुवर्णस्रजमग्निमीडे॥ वराभ
यस्वस्तिकशक्तिहस्तं पद्मस्थमाकल्पसमृद्धरुक्मम्॥१॥ इति ध्यात्वा मानसोप
चारैः संपूज्य जलेन संप्रोक्ष्याग्निं कुशैः परिस्तरेत्॥ पश्चिमदक्षिणोत्तरेषु पला
शमयेषु काष्ठेषु ब्रह्मविष्णुशिवान् पूजयेत्॥ ततः॥ पुनर्वह्नौ वह्नेः पीठदेवताभ्यो २८

नमः पीठशक्तिभ्यो नमः इति पीठं सम्यगभ्यर्च्य तत्र स्वहृदयाग्निमावाहयेत्॥ वैश्वानर
जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा॥ इति मंत्रेणावाह्य गंधादिभिः संपूज्य॥
वह्नेरावरणदेवताभ्यो नमः इति संपूज्य॥ वामे कुशानास्तीर्य तेषु वस्यमावस्तूनि निधापयेत्
॥ प्रणीताप्रोक्षणीपात्रे आज्यस्थाली चरुस्थाली श्रुचं श्रुवं अधोमुखान्येतानि होमद्रव्यघृतं॥
कुशान्॥ समिधः पंचपालाशीरन्यद्यदुपयोगि यत्॥ कृत्वा पवित्रे मूलेन प्रोक्षेत्तानि शुभां
भसा॥ उत्तानानि विधायाथ प्रणीतां पूरयेज्जलैः॥ तत्रैगंगे चेत्यादिनांकुशमुद्रया तीर्थमावा
ह्य तत्र विशेषार्घ्यजलं किंचित् क्षिप्य पवित्रे अन्ततोऽश्वतत्र निक्षिप्य उत्पवनं चरेत्॥ अथो
क्षिण्यां निधाय तां प्रोक्षण्यां तज्जलं क्षिपेत्॥ तेन पवित्रगेन जलेन हवनीयसामग्रीं प्रोक्षे
त्॥ मूलेन मूलगायत्र्या वा प्रशानमद्धत्यनेन॥ प्रणीतायाः प्रोक्षणं आज्यस्थाल्याः प्रोक्षणं चरुस्थाल्याः
श्रुवः प्रोक्षणं श्रुवस्य प्रोक्षणं होमद्रव्यस्य प्रोक्षणं घृतस्य प्रो॰ कुशानां प्रो॰ समिधां प्रो॰ सर्व
स्यापि होमोपयोगिद्रव्यस्य प्रो॰ ततो दक्षिणे पीठं संपूज्य तत्र ब्रह्माणमावाह्य ब्रह्मणे नम इ
त्यनेन संपूज्य हस्ताभ्यां श्रुवस्रुचौ धृत्वा तापयेत्त्रिरधोमुखौ॥ वामहस्तेन तौ धृत्वा दर्भै
र्दक्षेन मार्जयेत्॥ संप्रोक्ष्य प्रोक्षणीतोयैः प्रताप्य पूर्ववत्पुनः॥ अग्नौ मार्जनदर्भान् न्यसेत्॥

२८ त्योर्मूले हां इच्छाशक्त्यै नमः॥ मध्ये ह्रीं ज्ञानशक्त्यै नमः॥ अग्रे हूं क्रियाशक्त्यै नमः इति न्यस्य॥ नमः
शक्त्यै इति स्रुचि॥ नमः शंभवे इति स्रुवे विन्यस्य सूत्रत्रयेण संवेष्ट्य कुसुमादिभिः संपूज्य स्वद
क्षिणे कुशोपरि स्थापयेत्॥ ततः आज्यस्थालीमानीय अस्त्राय फडिति संप्रोक्ष्य तत्राज्यं नि
क्षिप्य मूलेन ईक्षेत॥ अस्त्राय फडिति संप्रोक्ष्य कु[illegible]शैस्ताडयेत्॥ हुमित्याचिंच्य मूलेनाभि
मंत्रयेत्॥ वमिति धेनुमुद्रयाऽमृतीकृत्य षडंगसंस्कारान्कुर्वीत॥ कुण्डोद्धृतवायुकोणस्थांगा
रे नमः इति तापनम्॥ कुशायुग्ममूलं प्रज्वाल्य आज्ये क्षिप्त्वाऽनले क्षिपेत्॥ ततः दीप्तदर्भयु
ग्मेनाज्यं हुमिति नीराजयेत्॥ पुनर्दर्भत्रयं दीप्तं फडिति [illegible]घृते दर्शयेत्॥ ततः दक्षह
स्तेन घृतपात्रमादाय वामहस्ते निधाय तदंगारान्वह्नौ निक्षिप्य सलिलं स्पृशेत्॥ ततः
अंगुष्ठानामिकाभ्यां दर्भयुग्ममादाय फडिति त्रिरग्निसंमुखमाज्यं क्षिपेत्॥ ततः नम इति
आत्मसंमुखं आज्यक्षेपः॥ ततो दर्भद्वयं ग्रंथयित्वा घृते क्षिपेत्॥ ततोऽग्नेर्वामदक्षभागे
इडापिंगलासुषुम्नाख्यं नाडीत्रयं च स्मृत्वा नम इति दक्षभागात्स्रुवेणाज्यमादाय अग्नये
स्वाहा इत्यग्नेर्दक्षनेत्रे जुहुयात्॥ पुनस्तथैव वामभागादाज्यमादाय ॐ सोमाय स्वाहा इ २८
ति वामनेत्रे जुहुयात्॥ मध्यभागादाज्यमादाय अग्नीषोमाभ्यां स्वाहा इति तृतीयनेत्रे जु

ततः प्रसृतचरुं श्रपयित्वानीय हरीं इ
त्यभिमन्त्र्य स्थापयेत्॥ ४

हुयात्॥ पुनर्दक्षभागादाज्यमादाय अग्नये स्विष्टकृते स्वाहा इति मुखे जुहुयात्॥ अनेन वह्नेर्नेत्रमु
खोद्घाटनं भवति॥ ततः ॐ भूः स्वाहा इदमग्नये न मम॥ ॐ भुवः स्वाहा इदं वायवे न मम॥ ॐ स्वः
स्वाहा इदं सूर्याय०॥ ॐ भूर्भुवः स्वः स्वाहा इदं प्रजापतये० इत्याहुतिचतुष्टयं कृत्वा॥ वैश्वानर
जातवेद इहावह लोहिताक्ष सर्वकर्म्माणि साधय स्वाहा इत्यनेन मंत्रेणाहुतित्रयं जुहुयात्॥
ततः नवभि इष्टाभिस्त्रिभिरेकैकाभिराहुतिभिर्वाऽग्नेः पंचदश संस्कारान्कुर्यात्॥ यथा
ॐ अस्याग्नेः गर्भाधानसंस्कारं करोमि स्वाहा॥ एवं ॐ अस्या० पुंसवनसं० ॐ० सीमंतोन्न
यनसं० ॐ० जातकर्मसं० पंचपालाशसमिधो घृताक्तमूलाग्रा नो स्वाहा। विना होमेन नाल
अग्नेर्वंशि वनामासि ८ छेदनसंस्कारं० ॐ० नामकरणसं० ॐ० उपनिष्क्रमणसं० ॐ० अन्नप्राशनसं० ॐ० चू
डाकरणसं० ॐ० कर्णवेधसं० ॐ० मौंजीबंधनसं० ॐ० वेदारंभसं० ॐ० केशांतसं० ॐ०
व्रतविसर्गसं० ॐ० विवाहसं० ॐ अस्य शिवनाम्नः अग्नेश्चतुर्थीकर्म्मसं० इति पंचदश १५
संस्कारान्कृत्वा॥ अग्नेः पितरौ वागीशीवागीश्वरौ पंचोपचारैः संपूज्य संहारमुद्रया स्वहृदय
मानयेत्॥ ततः ॐ अग्नेरावरणदेवताभ्यः स्वाहेति सकृत्पृथग्वा जुहुयात्॥ पितः ॐ इति
स्रुवेणाज्यं च तुर्वारं स्रुचि निधाय स्रुचं स्रुवेणाच्छाद्य करयुग्मेन गृहीत्वा तिष्ठन्त्यो मूलेन

असितांगो रुरुश्चण्डः क्रोधोन्मत्तकपालकः॥ कपाली भीषणश्चैव संहारश्चाष्टभैरवाः॥

२९ अग्नेरावरणदेवताः यथा॥ तत्र लिखितयंत्रस्य षट्कोणेषु[redacted]षट्सु मध्ये सप्तजिह्वा तत्तद्देव
ताश्च इति प्रथमावरणं केसरेषु षडंगैर्द्वितीयं जातवेदसइत्यादिभि[redacted]स्तृतीयं ब्राह्म्यादिभिश्च
तुर्थं असितांगादिभिः पंचमं इन्द्रादिभिः षष्ठं वज्रादिभिः सप्तमं॥ तानेव क्रमेण प्रदर्श्यंते॥
हिरण्यायै स्वाहा॥ गगनायै० रक्तायै० कृष्णायै० सुप्रभायै० बहुरूपायै० अतिरक्तायै० इति
[redacted]षट्कोणस्थानेषु॥ सुरेभ्यः स्वाहा॥ पितृभ्यः० गंधर्वेभ्यः० यक्षेभ्यः० नागेभ्यः० पिशा
चेभ्यः० राक्षसेभ्यः०॥ इति प्रथमावरणम्॥ ॐ सहस्रार्चिषे स्वाहा॥ ॐ स्वस्तिपूर्णाय०॥ ॐ
उत्तिष्ठपुरुषाय०॥ ॐ धूमव्यापिने०॥ ॐ सप्तजिह्वाय०॥ ॐ धनुर्द्धराय०॥ इति द्वितीयं॥ ॐ अ
ग्नये जातवेदसे० ॐ अग्नये[redacted]जिह्वाय०॥ ॐ अग्नये हव्यवाहनाय०॥ ॐ अग्नये अश्वोद
रजाय० ॐ अग्नये वैश्वानराय० ॐ अग्नये कौमारतेजसे० ॐ अग्नये विश्वमुखाय० ॐ अ
ग्नये देवमुखाय० इति तृतीयं॥ ब्राह्म्यै० माहेश्वर्यै० ॐ कौमार्यै० ॐ वैष्णव्यै० ॐ वाराह्यै०
ॐ इन्द्राण्यै० ॐ चामुण्डायै० ॐ महालक्ष्म्यै० इति चतुर्थं॥ दलाग्रेषु॥ असितांगभैरवाय
स्वाहा० रुरुभैरवाय० चण्डभैरवाय० क्रोधनभैरवाय० उन्मत्तभैरवाय० कपालीभैरवा
य० भीषणभैरवाय० संहारभैरवाय० इति पंचमं॥ धरापुरे स्वस्वदिक्षु च॥ ॐ इन्द्राय० २९

ॐ अग्नये० ॐ यमाय० ॐ नैर्ऋतये० ॐ वरुणाय० ॐ वायवे० ॐ कुबेराय० ॐ ई
शानाय० ॐ ब्रह्मणे० ॐ अनंताय० इति षष्ठं॥ इन्द्रादिसमीपएव॥ वज्राय० शक्तये०
दण्डाय० खड्गाय० पाशाय० अंकुशाय० गदायै० त्रिशूलाय० पद्माय० चक्राय स्वाहा
इति स[redacted]रणे देवानामेकैकामाहुतिं दद्यात्॥ ॥ततः ॐ इति स्रुवेणाज्यं चतुर्वारं स्रु
चि निधाय स्रुचं स्रुवेणाच्छाद्य करयुग्मेन गृहीत्वा तिष्ठन् तयोर्मूलं नाभौ कृत्वाग्रे पुष्पं
दत्वा तयोर्मूलं वामस्तनान्तमानीय॥ ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वक
र्माणि साधय स्वाहा वौषट्॥ इति संपत्यर्थं जुहुयात्॥ ततः महागणेशमंत्रेण व्य
स्तेन दशधा समस्तेन चतुर्धाज्यं जुहुयात्॥ यथा॥ ॐ स्वाहा १ ॐ श्रीं २ ॐ श्रीं ह्रीं०
३ ॐ श्रीं ह्रीं क्लीं० ४ ॐ श्रीं ह्रीं क्लीं ग्लौं० ५ ॐ श्रीं ह्रीं क्लीं ग्लौं गं० ६ ॐ श्रीं ह्रीं क्लीं ग्लौं ग
णपतये० ७ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद० ८ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपत
ये वरवरद सर्वजनं मे वशं० ९॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे
३० वशमानय स्वाहा १०॥ एवं दशधा कृत्वा समस्तेन चतुर्धा जुहुयात्॥ एवमग्निसंस्कारं कृत्वा

मं

३० अग्नौ श्रीसदाशिवस्य सर्वोक्तविधिना पीठं प्रकल्पयेत्॥ ततः मूलेनासनं कृत्वा। ॐ अस्य श्री
शिवमंत्रस्य वामदेव ऋषये नमः शिरसि। पंक्तिश्छंदसे नमः मुखे॥ श्रीसदाशिवदेवतायै नमः
हृदये। नं अंगुष्ठयोः॥ मः तर्जन्योः। शिं मध्यमयोः। वां अनामिकयोः। यं कनिष्ठयोः॥ नमःशि
वाय करतलकरपृष्ठयोः॥ नं हृदयाय नमः॥ मः शिरसे स्वाहा॥ शिं शिखायै वषट्॥ वां कवचा
य हुम्॥ यं नेत्रत्रयाय वौषट्॥ नमःशिवाय अस्त्राय फट्॥ ध्यायेन्नित्यमिति ध्यात्वा॥ मा
नसोपचारैः संपूज्य। हस्ते पुष्पं गृहीत्वा वहन्नासारंध्रेण पुष्पे संयोज्य तत्पुष्पं वह्निस्थपी
ठे दत्वा स्थापयेत्॥ आवाहनादिमुद्राः प्रदर्श्य गंधाद्युपचारैः संपूज्य वह्निरूपस्य देवस्य
मुखे मूलेन पंचविंशत्याज्याहुतीर्जुहुयात्॥ तेन वह्निदेवयोर्मुखैकरणं भवति॥ ततः मूले
न तयोर्नाडीसंधानसिध्यर्थं एकादशाहुतीः कृत्वा आवरणदेवतानामेकैकामाहुतिं दद्यात्
आवरणदेवता यथा॥ नं तत्पुरुषाय० मः अघोराय० शिं सद्योजाताय० वां वामदेवाय०
यं ईशानाय० निवृत्त्यै० प्रतिष्ठायै० विद्यायै० शांत्यै० शांत्यतीतायै० प्रथमं॥ नं हृदयदेवतायै०
मः शिरोदेवतायै० शिं शिखादेवतायै० वां कवचदेवतायै० यं नेत्रदेवतायै० नमःशिवाय अ
स्त्रदेवतायै०॥ इति द्वितीयं॥ अनंताय० सूक्ष्माय० शिवोत्तमाय० एकनेत्राय० एकरुद्राय०
त्रिमूर्तये० श्रीकंठाय० शिखंडिने०॥ इति तृतीयम्॥ उमायै स्वाहा० चंडेश्वराय० नंदिने० ३०

तत्तन्मंत्रैः ३

महाकालाय० गणेशाय० वृषभाय० भृंगिरिटये० स्कंदाय०॥ इति चतुर्थं॥ इंद्रादिभिः पंच
मं वज्रादिभिः षष्ठं॥ एवमावरणदेवतानां दत्वा मूलेन दशवारं घृतं जुहुयादिति॥ ॥
ततः नवग्रहेभ्यो लोकपालेभ्यश्च समिधाज्यचरुहोमः कर्तव्यस्तत्र समिधो यथा॥ अर्कः
पालाशः खदिर अपामार्गश्च पिप्पलः॥ औदुंबरः शमी दूर्वाः कुशाश्च समिधो नवेति॥
अथ होममंत्राः॥ आकृष्णेनेति हिरण्यस्तूप ऋषिः सविता देवता त्रिष्टुप् छंदः आदित्यप्रीतये तिलाज्य
चर्वर्कसमिद्धोमे विनियोगः॥ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेना
सविता रथेना देवो याति भुवनानि पश्यन्॥ स्वाहा इदमादित्याय न मम। इमं देवा इति वरुण ऋषिः
सोमो देवता अनुष्टुप् चन्द्रप्रीतये तिलाज्यचरुपालाशसमिद्धोमे विनियोगः॥ इमं देवा असप
ज्येष्ठाय महते त्नं सुवध्वं महते क्षत्राय महते ज्ञानराज्यायेन्द्रस्येन्द्रियाय॥ इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश ए
ष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानां राजा स्वाहा इदं चन्द्रमसे न मम। अग्निर्मूर्धेति विरू
पाक्ष ऋषिः अंगारको देवता भौमप्रीतये तिलाज्यचरुखदिरसमिद्धोमे० ॐ अग्निर्मूर्धा दिवः
ककुत्पतिः पृथिव्या अयम्। अपां रेतांसि जिन्वति स्वाहा॥ इदं भौमाय न मम। उद्बुध्यस्वेति प

परमेष्ठी ऋषिः बुधो देवता यजुः बुधप्रीतये तिला० अपामार्गसमि० उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टा
३१ पूर्त्ते संसृजेथामयं च ।। अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ।। स्वाहा इदं
बुधाय० ।। बृहस्पते अति यदर्य इति गृत्समद ऋषिः त्रिष्टुप् छन्दः बृहस्पतिप्रीतये तिला० पिप्पलसमिद्धोमे०
बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रवि
णं धेहि चित्रम् ।। स्वाहा इदं बृ० ।। अन्नात्परिस्रुत इति अश्विसरस्वतीन्द्रा ऋषयः शुक्रो देवता जगती
छन्दः शुक्रप्रीतये तिला० औदुंबरस० ।। अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं
प्रजापतिः ।। ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु
स्वाहा ।। इदं शुक्राय० ।। शन्नो देवीरिति दध्यङ्ङाथर्वण ऋषिः शनिर्देवता गायत्री छन्दः शनि
प्रीतये तिला० शमीसमि० ।। शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वा
हा ।। इदं शनये० ।। कया नश्चित्र इति वामदेव ऋषिः राहुर्देवता गायत्री छन्दः राहुप्रीतये तिला०
दूर्वास० ।। कया नश्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता स्वा० ।। इदं राहवे०
केतुं कृण्वन्निति मधुच्छन्द ऋषिः केतुर्देवता गायत्री छन्दः केतुप्रीतये तिला० कुशसमिद्धोमे वि० ३१

केतुं कृण्वन्न केतवे पेशो मर्या अपेशसे समुषद्भिरजायथाः स्वाहा ।। इदं केतुभ्यो० ।। यथा बाणप्रहा
राणां कवचं भवति वारणं ।। तद्वद्देवोपघातानां शान्तिर्भवति वारणम् ।।१।। अथाधिदेवतानां हो
मः ।। त्र्यंबकमिति वसिष्ठ ऋषिः रुद्रो देवता अनुष्टुप् छंदः रुद्रप्रीतये तिला० स्य चरुहोमे विनियो
गः ।। त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं ।। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ।। स्वा
हा ।। इदं रुद्राय० ।। श्रीश्च ते इति उत्तमनारायण ऋषिः श्रीर्देवता त्रिष्टुप् छंदः श्रीप्रीतये तिला
दिहोमे वि० ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं इष्णन्नि
षाण मुम्म इषाण सर्वलोकं म इषाण स्वाहा ।। इदं श्रियै० ।। यदक्रंद इति भार्गव यमदग्निर्दीर्घ
तमसा ऋषयः स्कन्दो देवता त्रिष्टुप् छंदः स्कंदप्रीतये तिलादि० ।। ॐ यदक्रंदः प्रथमं जायमान
उद्यन्त्समुद्रादुत वा पुरीषात् ।। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् स्वाहा
इदं स्कंदाय० ।। इदं विष्णुरिति मेधातिथि ऋषिः विष्णुर्देवता गायत्री छन्दः विष्णुप्रीतये
तिलादि० ।। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे स्वाहा इदं विष्णवे० ।।
ब्रह्म यज्ञानमिति प्रजापति ऋषिः ब्रह्मा देवता त्रिष्टुप् छंदः ब्रह्मप्रीतये तिला० ।। ब्रह्म यज्ञा
नं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसत

32 अविवः स्वाहा॥ इदं ब्रह्मणे०॥ त्रातारमिन्द्रमिति अग्निसरस्वतीन्द्रा ऋषयः॥ इन्द्रो देवता
त्रिष्टुप्छन्दः इन्द्रप्रीतये तिला०॥ त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्र
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः॥ स्वाहा॥ इदमिन्द्राय०॥ अ
सि यम इति भार्गव यमादग्निर्दीर्घतमसा ऋषयः यमो देवता त्रिष्टुप्छन्दः यमप्री०
तिला०॥ असि यमो असि त्रितो गुह्येन व्रतेन असि सोमेन समया विपृक्त आहुस्ते त्रीणि
दिवि बन्धनानि॥ स्वाहा॥ इदं यमाय०॥ काषिरसीति दध्यङ्ङाथर्वण ऋषिः आपो देवता अ
नुष्टुप्छन्दः कालप्रीतये तिला०॥ ॐ काषिरसि समुद्रस्य त्वाक्षित्या उन्नयामि समा
पो अद्भिरग्मत समोषधीभिरोषधीः स्वाहा॥ इदं कालाय०॥ चित्रावसो इति वसु
ऋषिः चित्रगुप्तो देवता जगती छन्दः चित्रगुप्तप्रीतये तिला०॥ चित्रावसो स्वस्ति ते पारम
शीय स्वाहा॥ इदं चित्रगुप्ताय०॥ मधावाणे०॥ इत्यधिदेवताः॥ अथ प्रत्यधिदेवता
नां मन्त्राः॥ अग्निं दूतमिति विरूप ऋषिः अग्निर्देवता गायत्री छन्दः अग्निप्रीतये
तिला०॥ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे देवाँ आ सादयादिह॥ स्वाहा॥ इदमग्नये० 32
आपो हि ष्ठेति सिन्धुद्वीप ऋषिः आपो देवता गायत्री छन्दः अपां प्रीतये तिला०॥ ॐ आपो हिष्ठा

मयो भुवस्ता न ऊर्जे दधातन महे रणाय चक्षसे स्वाहा॥ इदमद्भ्यो०॥ स्योना पृथिवीति मेधा
तिथि ऋषिः पृथिवी देवता गायत्री छन्दः पृथिवीप्रीतये तिलादि०॥ ॐ स्योना पृथिवी नो
भवानृक्षरा निवेशनी॥ यच्छा नः शर्म सप्रथः स्वाहा॥ इदं पृथिव्यै०॥ इदं विष्णुरिति मेधा
तिथि ऋषिः विष्णुर्देवता गायत्री छन्दः विष्णुप्रीतये तिलादि०॥ इदं विष्णुर्विचक्रमे त्रेधा
नि दधे पदं समूढमस्य पांसुरे॥ स्वाहा॥ इदं विष्णवे०॥ त्रातारमिन्द्रमिति अग्निसर
स्वतीन्द्रा ऋषयः इन्द्रो देवता त्रिष्टुप्छन्दः इन्द्रप्रीतये तिला०॥ त्रातारमिन्द्रमवितारमिन्द्रं
हवे हवे सुहवं शूरमिन्द्रं ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः॥
स्वाहा॥ इदमिन्द्राय०॥ निषु त्वेति गृत्समद ऋषिः वायुर्देवता गायत्री छन्दः शचीप्रीतये
तिलादि०॥ ॐ इन्द्रं देवीर्विशो मरुतोऽनुवर्त्मानो भवन्यथेन्द्रं देवीर्विशो मरुतोऽनुव
र्त्मानो भवन्तु॥ स्वाहा॥ इदं शच्यै०॥ प्रजापते नेति प्रजापतिऋषिः प्रजापतिर्देवता त्रि
ष्टुप्छन्दः प्रजापतिप्रीतये तिलादि०॥ ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि
ता बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा॥ इदं प्रजा
पतये०॥ नमोऽस्त्विति देवा ऋषयः सर्पा देवता गायत्री छन्दः सर्पप्रीतये तिला०॥ ॐ नमोऽस्तु

३२ सर्वेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ स्वाहा ॥ इदं सर्पेभ्यो० ॥ ब्र
ह्मयज्ञानमिति प्रजापति ऋषिः ब्रह्मा देवता त्रिष्टुप्छंदः ब्रह्मप्रीतये तिलादि० ॥ ॐ ब्रह्म
यज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनि
मसतश्च विवः ॥ स्वाहा ॥ इदं ब्रह्मणे० ॥ इति प्रत्यधिदेवतानां मंत्राः ॥ यथावालप्र० ॥
अथ पंचलोकपालानां मंत्राः ॥ गणानां त्वेति देवा ऋषयः गणपतिर्देवता गणपतिप्रीत
ये तिला० ॥ ॐ गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं हवामहे निधी
नां त्वा निधिपतिं हवामहे वसो मम ॥ आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥ स्वाहा ॥
इदं गणपतये० ॥ अंबे अंबिके इति देवा ऋषयः दुर्गा देवता दुर्गाप्रीतये तिला० ॥ अंबे
अंबिके अंबालिके न मा नयति कश्चन ससस्त्यश्वकः सुभद्रिकां कांपीलवासिनीम् ॥ स्वाहा
इदं दुर्गायै न० ॥ वातो वा मनो वेति गंधर्व ऋषिः उष्णिक्छंदः वायुप्रीतये तिलादि० ॥
वातो वा मनो वा गंधर्वाः सप्तविंशतिः । ते अग्रे अश्वमयुंजंस्ते अस्मिन् जवमादधुः ॥
स्वाहा ॥ इदं वायवे० ॥ ऊर्ध्वाऽस्येति प्रजापति ऋषिः आकाशो देवता गायत्री छं
दः आकाशप्रीतये तिलादि० ॥ ॐ ऊर्ध्वाऽस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्य ३२

ग्नेः द्युमत्तमा सुप्रतीकस्य सूनोः ॥ स्वाहा ॥ इदमाकाशाय० ॥ यावां कशेति प्रजापति ऋषिः ॥ अश्वि
नौ देवते अश्विनीकुमारप्रीतये तिला० ॥ ॐ या वां कशा मधुमत्यश्विना सूनृतावती तया यज्ञं मि
मिक्षतं ॥ स्वाहा ॥ इदमश्विनीकुमाराय० ॥ यथावाण० ॥ अथ दिक्पालानां मंत्राः ॥ त्रातारमि
न्द्रमिति त्वष्टिः सरस्वती वा ऋषयः इन्द्रो देवता इन्द्रप्रीतये तिला० ॥ ॐ त्रातारमिन्द्रमवितारमि
न्द्रं हवे हवे सुहवं शूरमिंद्रं ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ॥ स्वाहा
इदमिन्द्राय० ॥ अग्निं दूतमिति विरूपाक्ष ऋषिः अग्निर्देवता अग्निप्रीतये तिला० ॥ अग्निं दूतं पु
रो दधे हव्यवाहमुपब्रुवे देवाँ आसादयादिह ॥ स्वाहा ॥ इदमग्नये० ॥ ॐ असि यम इति भा
र्गव जमदग्नि दीर्घतमसा ऋषयः यमो देवता यमप्रीतये तिला० ॥ ॐ असि यमो असि
त्रितो गुह्येन व्रतेन असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बंधनानि ॥ स्वाहा ॥
इदं यमाय० ॥ असुन्वंतमिति प्रजापति ऋषिः निर्ऋतिर्देवता निर्ऋतिप्रीतये तिला० ॥ असु
न्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहि तस्करस्य अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋ
ते स्वाहा ॥ इदं निर्ऋतये० ॥ इमं मे वरुणेति शुनःशेप ऋषिः वरुणो देवता वरुणप्रीतये ति
ला० ॥ इमं मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके ॥ स्वाहा ॥ इदं वरुणाय० ॥ वा
तो वा मन इति गंधर्व ऋषिः ॥ वायुर्देवता वायुप्रीतये तिला० ॥ ॐ वातो वा मनो वा गंधर्वाः सप्त

३४ विष्टं शाति ते स्मै श्रमयं यस्ते अस्मिन्न जवुमादधुः स्वाहा ।। इदं वायवे० ।। कुविदङ्गेति सुक एव ऋषिः
सोमो देवता सोमप्रीतये तिला० ।। कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनु पूर्वं वियूय इहेहैषां कृ
णुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति ।। स्वाहा ।। इदं सोमाय० ।। त्र्यंबकमिति वशिष्ठ ऋषिः
शिवो देवता शिवप्रीतये तिला० ।। त्र्यंबकं यजामहे इति स्वाहा ।। इदं शिवाय० ।। नमोस्तु सर्पेभ्य इति
देवा ऋषयः सर्पा देवता त्रिष्टुप् छन्दः सर्पप्रीतये तिला० नमोस्तु सर्पेभ्यो ये के च पृथिवी मनु ।।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा इदं सर्पाय० ।। ब्रह्मयज्ञानमिति प्रजापतिऋषिः
ब्रह्मा देवता ब्रह्मप्रीतये तिला० ।। ब्रह्मयज्ञानमिति ।। स्वाहा ।। इदं ब्रह्मणे० ।। यथा बाण० ।। अ
पामलेल मध्यस्थापितानां देवानां मन्त्राः ।। ब्रह्मयज्ञानमिति प्रजापतिऋषिः ब्रह्मा देवता ब्रह्मप्री
तये ति० ब्रह्मयज्ञानमिति स्वाहा ।। इदं ब्रह्मणे० ।। त्र्यंबकमिति वशिष्ठ ऋषिः ।। रुद्रो देवता रुद्रप्री
तये ति० ।। त्र्यंबकं यजामहे इति ।। स्वाहा इदं रुद्राय० ।। इदं विष्णुरिति मेधातिथिऋषिः विष्णुर्दे
वता विष्णुप्रीतये तिला० इदं विष्णुर्विचक्रमे इति० स्वाहा इदं विष्णवे० गणानां त्वेति देवा ऋषयः
गणपतिर्देवता गणपतिप्रीतये ति० गणानां त्वेति० स्वाहा ।। इदं गणपतये० ।। श्रीश्च ते इति
उत्तमनारायण ऋषिः श्रीर्देवता श्रीप्रीतये तिला० श्रीश्च तेति पठित्वा स्वाहा ।। इदं श्रियै० ।। पंच
नद्य इति देवा ऋषयः सरस्वती देवता सरस्वतीप्रीतये तिला० ।। ॐ पंचनद्यः सरस्वतीमपि ३४

यन्ति सस्रोतसः सरस्वती तु पंचधा सो देशोभवत्सरित् ।। स्वाहा ।। इदं सरस्वत्यै० ।। अंबे अंबिके ति दे
वा ऋषयः दुर्गा देवता दुर्गाप्रीतये तिला० ।। अंबे अंबिके ति० स्वाहा ।। इदं दुर्गायै० ।। नहि स्पशमिति
शौनकायन ऋषिः क्षेत्रपालो देवता त्रिष्टुप् छन्दः क्षेत्रपालप्रीतये तिलादि० ।। नहि स्पशमविदन्नन्य
मस्माद्वैश्वानरात्पुर एतारमग्नेः एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षेत्रजित्याय देवाः स्वाहा
इति क्षेत्रपालाय न मम ।। पंचभूतेति परमात्मा ऋषिः पंचभूत देवता पंचभूतप्रीतये तिला० ।। पं
चभूताय त्वा नारातये स्वविष्ट्यै वेदच्छहं तां दुःख्याः पृथिव्या उर्वन्तरिक्षमन्वेमि पृथिव्यास्त्वा ना
भौ सादयाम्यदित्या उपस्थेग्ने हव्यं रक्ष पंचभूते० ।। स्वाहा इदं पंचभूताय० ।। विश्वकर्मा हि वि
वेति भौमन ऋषिः विश्वकर्मा देवता त्रिष्टुप् छन्दः विश्वकर्मणः प्रीतये तिलादि होमे० ।। ॐ विश्व
कर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।। तेषामिष्टानि समिषा मदन्ति यत्रा
सप्त ऋषीन्पर एकमाहुः ।। स्वाहा इदं विश्वकर्मणे न मम ।। अग्निरस्मि जन्मना जातवेदा
घृतं मे चक्षुरमृतं म आसन् ।। अर्कस्त्रिधातो रजसो धर्मो हविरस्मि नाम रेचो नमः ।।
स्वाहा ।। इदं जातवेदसे न मम ।। ।। एवं नवग्रहहोमं समाप्य स्वष्टिकृत होमं कुर्यात् ।। ।।
।। अथ नवग्रहाणां संग्रहेण नामान्यपि लिख्यन्ते ।। यत्र नाममंत्राणां प्रयोजनं तत्रोपयोगस्य ।
ॐ अर्काय० ॐ सोमाय० भौमाय० बुधाय० गुरवे० भृगवे० शनैश्चराय० राहवे० केतवे०

३५ अथाधिदेवताः ।। रुद्राय० उमायै० गुणाय० विष्णवे० ब्रह्मणे० इंद्राय० यमाय० कालाय० चित्रगु-
प्ताय० ९ ।। अथ प्रत्यधिदेवताः ।। अग्नये० अप्सुः० धरायै० विष्णवे० इंद्राय० इन्द्राण्यै० ब्रह्मणे०
पन्नगाय० ब्रह्मणे० ।। अथ लोकपालाः ।। गणेशाय० अंबिकायै० वायवे० आकाशाय० ।।
अश्विभ्यां० ५ ।। अथ दिक्पालाः ।। इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे०
कुबेराय० ईशानाय० ब्रह्मणे० अनंताय० ।। इति दिक्पालाः ततः ।। ब्रह्मणे० शिवाय० विष्णवे०
गणपतये० लक्ष्म्यै० सरस्वत्यै० ।। दुर्गायै० क्षेत्रपालाय० पंचभूतेभ्यः० विश्वकर्मणे० जातवे-
दसे० ।। इति ग्रहयज्ञः ।। अथ स्वेष्टदेवताहोमः तिलैराज्यान्वितैर्वा विधीयते वा पायसेन वा ।।
होमसमाप्तौ आवरणदेवतानां लिंगतोभद्रसर्वतोभद्रवास्तुयोगिन्याद्यावाहितसर्वदेवतानां
मेकैकामाहुतिं होमं व्यस्तां दद्यात् ।। ततो महाव्याहृतिहोमः ।। ॐ भूरग्नये च पृथिव्यै च म-
हते च स्वाहा ।। ॐ भुवो वायवे चांतरिक्षाय च महते च स्वाहा ।। ॐ स्वरादित्याय च दिवे च म-
हते च स्वाहा ।। ॐ भूर्भुवः स्वश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यो महते च स्वाहा ।। इत्याहु-
तिचतुष्टयं कृत्वा दिक्पालेभ्यो नवग्रहेभ्यो विनायकक्षेत्रपालादिभ्यः दधिमाषभक्तबलिं
दत्वा पूर्णाहुतिं जुहुयात् ।। ॐ इतः प्राणाद्युदिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्था ३५

ष्वें १

अथ

"गङ्गास्तोत्रम्"

धर्मस्वकृतम्

137/12 (13) (B)

X

श्रीगणेशाय नमः॥ घर्मस्व ऊं॥ गंगे समस्तजगदंबचलत्तरंगे नंगारिचारुतरम
स्तकपुष्पमाले॥ कंसारिचारुचरणांरेणु रुत्रीं भक्त्या नमामि दुरितत्रयकारिणीं
१ त्वां॥१॥ मातः समस्तसुखदे प्रवरे नदीनां व्यासादिविप्रचयगीतगुणोगुणाढ्ये॥
संसारभैरवमहार्णवमध्यनौके वंदे तवांघ्रियुगलं दुरितापहारि॥२॥ यस्यास्तवां
बुकणं रिणा कामपि जन्तुकन्यसौदासनामनृपतिर्द्विजकोटिहंता॥ संप्राप्यमुक्ति
मगमत्रिदशैरलभ्यां तां त्वां नमामि शिरसा वरदे प्रसीद॥३॥ नारायणाच्युतजनार्दन
कृष्णनाम गंगादिनाम गदतो मम देवि मातः॥ संसारपातकनिवारिणि देह
पातस्वधारिणि रमवतुत्वेद कुम्रहेणा॥४॥ किं वा तपोभिरखिलैः श्वारिकिं जपै
वा दानैः श्वकिं तुरगमेधमखैः श्वकिं वा॥ त्वन्नीरशीकरमवाप्य सुरैरलभ्यां मुक्तिं व्र
जंति मनुजाः प्रतिपापिनोपि॥५॥ स्वाराज्यमेव परमेश्वरि पाश्वधात्वं मीवीराणं दपि
त्रैलोकसुत्तपिरेतोः॥ सत्वं रजस्तम इति त्रिगुणास्वरूपा सृष्टिस्थितिप्रलयकारिणि नौमि
तां त्वां॥६॥ धत्ते ललाटफलके तव सैकतं यः श्रुंड्वर्द्दंदितवतीरमदासदैव॥ त्वन्ना राम
मसर्वरसधाम वदेच्छ भक्त्या तत्पादरेणुरखिलोस्तु ममैव मूर्द्ध्नि॥७॥ त्वद्रोधसि त्रि १

वपुषिगेनसतिंविधायपीत्वाचवारितवपातकनाशकारी।।स्मृत्वाचनामतववी
चिरयंचदुष्कसंसारबंधनहरेममपातुजन्म।।८।।नाकंशरुमेसुमरद्भुसिताम
जाः कुर्वंतिभीतिमतिडगमवर्त्मेमत्वा।।व्यर्थैवसाकिलयतोमतदैत्वदीयं
सोपानमृतमुदकंत्रिदिवप्रयाणे।।९।।पापानिरोगनिकराश्चशरीरिदेहे तिष्ठति
तावदखिलेश्वरिमुक्तिदात्रि।।कुर्वंतियावदमलेषुतवोदकेषुस्नानंनहित्रिपथगे
सरितांप्रधाने।।१०।।यस्यास्तवाच्यु तविरंचिशिवादयोपिशक्रादिदेवनिकराचकि
तुंमहिम्नः।।११।।पारंपरेपरममोक्षपदप्रदात्रीतांत्वांवदंतितटिनीमितिकेपिमोहात्।।
गंगेसमस्तसुरवंद्यपिनिकिंचिदेवजानातितेपशुपतिर्भमगवानरत्वां।।१२।।यस्माद
सौसुमनसांप्रवरोतिमत्वाधत्तेकदाचशिरसाजगतीश्वरीत्वां।।गंगेदेविजगन्मातःप्र
सीदपरमेश्वरि।।परित्राहिनमस्तुभ्यंरक्षमांसेवकंस्वकं।।१३।।परब्रह्मस्वरूपांत्वांसर्वेषां
वैकमातरं।।शक्रोमिकिमहंस्तोतुंभ्रांतचित्तोत्रमोहदे।।१४।।मयाकृतेनस्तोत्रेनयस्त्वांसौ

२ तिसरिद्वरे॥ सोपि लब्ध्वाखिलान्कामानन्ते यास्यति सद्गतिं॥१५॥ गं गेनाचा॥ अन
याभवतो भक्त्या संतुष्टास्मि द्विजोत्तम॥ श्रीहंभूते कुशलं सर्वं भविष्यति न संश
यः॥१६॥ त्वयाकृतमिदं स्तोत्रं त्रिसंध्यं यः पठेन्नरः॥ तस्याहमपि संतुष्टा दास्या
मि इष्टिमुत्तमां॥ इति श्रीपद्मपुराणे रोगउद्धरतिखंडे धर्मस्यकृतं गंगास्तोत्रं स
माप्तं॥ शुभं भूयात्॥ नाचाकुरुणा न्यो नम

137
12 (B)

गंगास्तोत्रम्।
समाप्तम्।

रा.म
२

अथ

"कालिकाकवचम् ।"

१ श्रीगणेशायनमः कैलाशशिखरेरम्यनानाचित्रविचित्रिते कालिकांपरिपप्रच्छ भैरवोलो
कनायकः १ श्रीभैरवउवाच कालिकायामहाविद्यांकथितांभुविदुर्लभा तथापिहृदयेस्वाम
लिरंधिक्रियांकुरु २ कवचंतुमहादेविकथयस्वानुकंपया यदिनोकथ्यतेमातर्विमुच्या
मिकलेवरम् ३ श्रीदेव्युवाच शङ्कापिजायतेयत्नात्तवस्नेहात्प्रकाश्यते सर्वतंत्रेहिगोप्याहिका
लिकुलेप्रकाशितम् ४ कवचंहितथादेवशृणुष्वासर्वकामदः रहस्यंत्वन्महादेवसु
गोप्यंभुवनत्रये ५ कथयिष्यामिमंत्रौघानांसर्वसिद्धिकरंपरम् नवक्तव्यंनदृष्टव्यंभित्ति
गुह्यंतरंमहत् ६ कालिकादेवताचतुर्वर्गसिद्ध्यर्थेजपविनियोगः क्रींकालिमेपुरतः
पातुपृष्ठेचतत्रकपालिनी कुल्लामेदक्षिणेपातुकुरुकुल्लातथोत्तरे ७ विरोधिनिशि १

२ भोविद्यैतेकचित् १७ अथमंत्रः ॐ ऐंह्रींकालिकेमहाकालिकेमहिषमर्द्दिनिजयनिस्वाहा
अष्टोत्तरशतंजप्त्वामौनीस्वजेमनुष्यता देशउरमसांनपिसाधिनोमराद्वाँहनीममचिंतितं
कार्य्यंचिंतितोभोप्राप्नेनस्वप्नंपश्यति जाप्यम् १०८ व्यालपुष्पतुमालायांस्योमर्दुर्नेतुआसनः
जपित्वामोनमंत्रेणासर्वसिद्धिप्रजायते १८ मारणंमोहनंचैववशीकरणउच्चाटनम् आकर्ष
णंतुपुनर्द्दिव्यापंचवांनांनितोभवः १९ शीघ्रमारणात्त्वेयादेव्यामार्णेमाहिषासनम् मोहनं २
तुअजाचर्म्मेमृगचर्म्मेवशंकरम् २० उच्चाटनेतुखरश्चर्म्मेआकर्षणेसैंव्याघ्रचर्म्मणि
एवंआसननतोदेविसाधयित्वाविचक्षणाः २१ मारणंतुदक्षिणोदेविपश्चिमेचउच्चाटनम्
उत्तरेमोहनेयस्यपूर्वेवश्यकृतेभवः २२ आकर्षणंगगनंयस्यपातालेसर्वसिद्धिदम्
एवंमुखप्रजप्तस्यसाधकस्साधकोत्तमैः २३ अस्यविधिरमहिषारामराईसिद्धार्थंहो २

रःपातुचिप्रचित्तामेचक्षुषी उग्रामेनाशिकांपातुकर्णौचोग्रप्रभावता ८ वदनंपातुमेदी
प्तानीलाचचिबुकंतथा घनाग्रीवांसदापातु कालिकाबाहुयुग्मकम् ९ मात्रापातुक
रद्वंद्वंवक्षोमेमुद्रासदावतु मित्रापातुस्तनद्वंद्वंयोनिमण्डलदेवता १० ब्राह्मीमेजठरंपातु
५ नाभिंनारायणीतथा गुह्यंमाहेश्वरीनित्यंचामुंडापातुलिंगकम् ११ कौमारीच कटिंपातु
तथैवजंघयुग्मकम् अपराजिताचपादौमेवाराहीपातुचांगुलीम् १२ संधिंस्थानंनारसिंही
पत्रस्थादेवतावतु रक्षाहीनंतुयत्स्थानंवर्जितंकवचेनतु १३ तत्सर्वंरक्षमेदेवि कालिकेघोरदक्षि वि
णे ऊर्ध्वमधस्तथादिक्षुपातुत्वंदेविस्वयंतनुः १४ हिंस्रेभ्यःसर्वदापातुसाधकंचजलादिकः दक्षि चे ३
णाकालिकेदेविव्यापकत्वेसदावतु १५ इदंकवचमज्ञात्वायोजपेद्घोरदक्षिणाम् नपूजाफलमा
प्नोति विस्तरस्यपदेपदे १६ कवचेनावृतोनित्यंयत्रयत्रैवगच्छति तत्रतत्रभवेत्सिद्धिंनसं

137/12 (9)


३ मकीजेश्रगमारस्या: अजारोमरोचनाअश्रीतैलमोमेंहोमुकीजैमोहनंभवति मरगमदंमधुमुर
ठठी टंकनरव काकजीभा प्रेतअंगार गोरोचन होमकीजेवशीकरणहोई खरकीपांशुली
वीर कालाधतूराकीजर ऊंटकोखुर तिलकोतेलहोमकीजे उच्चाटनहोई व्याघ्ररोमः गुगुल
गुडुलू कौंआँरवीरवहेटी मैंरवीरशर्कराहुतनहोमकीजे आहुति १०८ नित्यदिन ७ आकर्षणो
भवति इत्यातरतंत्रेशिवभाषितं कालिकाकवचंसमाप्तम् शुभंभूयात रामायनमः


ॐ कालीकालीमहाकालीगमेंलेर मनकीमाला लकलकलावकेभेंराठारा चलोवि
सम गहलसी मनसाकूंवरी आदीकुंवारी पूजैगंनाथ वैरी दौरी लागेपाव आनशुद्धेया
अन्नपूरणीमाई मेरीभक्ती गुरुकीसक्ती फुरोमंत्रईश्वरोवाच लक्ष १००००२०॥ ३

जय

श्रीमद्भैरवाय स्वाहा







श्रीमद्भैरवाय स्वाहा

श्रीमद्भैरवाय स्वाहा

श्रीमद्भैरवाय स्वाहा

137/12 (C)

कालिकाकवचम्

137/12 (E)

137/12(E)

इति

कालिकाकवचम्

समाप्तम्

१

श्रीगणेशायनमः ॥ तथाचभैरवतंत्रे ॥ भैरव्युवाच ॥ कालीपूजाश्रुतानाथभावश्च
विविधाःप्रभो ॥ इदानींश्रोतुमिच्छामिकवचंपूर्वसूचितम् ॥ १ ॥ त्वमेवकारणंना
थात्राहिमांदुःखसागरात् ॥ भैरवउवाच ॥ रहस्यंश्रृणुवक्ष्यामिभैरविप्राण
वल्लभे ॥ २ ॥ श्रीजगन्मंगलंनामकवचंमंत्रविग्रहम् ॥ पठित्वाधारयित्वा
य५ चत्रैलोक्यंमोक्षरणात् ॥ ३ ॥ नारायणोपियंधृत्वानारीभूत्वामहेश्वरम् ॥ योगी-
शंक्षोभमनयद्धृत्वाचरघूद्वहः ॥ ४ ॥ वरदृप्तान्जघानैवरावणादिनिशाच-
रान् ॥ यस्यप्रसादादीशोपित्रैलोक्यविजयीप्रभुः ॥ ५ ॥ धनाधिपःकुवेरोपि
सुरेशोभूच्छचीपतिः ॥ एवंहिसकलादेवाःसर्वसिद्धेश्वराःप्रिये ॥ ६ ॥ श्रीज राम:

१

गन्मंगलस्यास्यकवचस्यऋषिःशिवः ॥ छंदोनुष्टुप्देवताचदक्षिणाकालिके
रिता ॥ ७ ॥ जगतामोहनेदुष्टविजयेभुक्तिमुक्तिषु ॥ योषिदाकर्षणेचैवविनि
योगःप्रकीर्त्तितः ॥ ८ ॥ ॐ शिरोमेकालिकापातुक्रींकारैकाक्षरीपरा ॥ क्रींक्रींक्रीं
मेललाटेचकालिकाखड्गधारिणी ॥ ९ ॥ हूंहूंपातुनेत्रयुग्मंह्रींह्रींपातुश्रुती
मम ॥ दक्षिणेकालिकेपातुघ्राणयुग्मंमहेश्वरि ॥ १० ॥ क्रींक्रींक्रींरसनांपा
तुहूंहूंपातुकपोलके ॥ सकलंवदनंपातुह्रींह्रींस्वाहास्वरूपिणी ॥ ११ ॥ द्वा
विंशत्यक्षरीस्कंधौमहाविद्याखिलप्रदा ॥ खड्गमुंडधराकालीसर्वांगम
भितोवतु ॥ १२ ॥ क्रींहूंह्रींत्र्यक्षरीपातुचामुंडाहृदयंमम ॥ ऐंहूंॐऐंस्तन
द्वंद्वंह्रींह्रींफट्स्वाहाककुत्स्थलम् ॥ १३ ॥ अष्टाक्षरीमहाविद्याभुजौपातु

२

सकर्त्तका॥ क्रीं नाभिमध्यदेशंचदक्षिणेकालिकेवतु॥१४॥ क्रीं स्वाहापा
र्श्वौछंचकालिकासादशाक्षरी॥ हूं ह्रीं दक्षिणेकालिके हूं हूं पातुकटिद्वयं॥१५॥
कालीदशाक्षरीविद्यास्वाहान्तेचोरुयुग्मकम्॥ ॐ ह्रीं हूं स्वाहामेपातु
जानुनीकालिकासदा॥१६॥ कालीह्न्नामविद्येयंचतुर्वर्गफलप्रदा॥ क्रीं
हूं ह्रीं पातुसागुल्फंदक्षिणेकालिकेवतु॥१७॥ क्रीं हूं ह्रीं स्वाहापदंपातु
चतुर्दशाक्षरीमम॥ खड्गमुंडधराकालीवरदाभयधारिणी॥१८॥ विद्या
भिःसकलाभिःसासर्वांगमभितोवतु॥ कालीकपालिनीकुल्लाकुरुकु
ल्लाविरोधिनी॥१९॥ विप्रचित्तातथोग्रोग्रप्रभादीप्ताघनत्विषः॥ नी

राम:
२

137/12 (६)

अथ
"कालिकाकवचम्"

स्य प्रसादतः ॥२६॥ महाकविर्भवेन्मासात्सर्वसिद्धीश्वरो भवेत् ॥ कृत्वां तत्रि
कालिकायै मूलेनैव पठेत्सकृत् ॥२७॥ स तु वर्षसहस्राणां पूजायाः फलमा
प्नुयात् ॥ भूर्जे विलिखितं चैतत्स्वर्णस्थं धारयेद्यदि ॥२८॥ शिखायां दक्षि
णे वाहौ कंठे वा धारयेद्बुधः ॥ त्रैलोक्यं मोहयेत्क्रोधात्त्रैलोक्यं चूर्णयेत्
क्षणात् ॥२९॥ पुत्रवान्धनवान्श्रीमान्नानाविद्यानिधिर्भवेत् ॥ ब्रह्मास्त्रा
दीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः ॥३०॥ नाशमायांति या नारी वंध्या वा
मृतपुत्रिणी ॥ कंठे वा वामवाहौ च कवचस्यास्य धारणात् ॥३१॥ वहुपु
त्रा जीववत्सा भवत्येव न संशयः ॥ न देयं परशिष्येभ्यो ह्यभक्तेभ्यो पि विशेषतः ॥३२॥

रामः
३

४

शिष्येभ्यो भक्तियुक्तेभ्यो चान्यथा मृत्युमाप्नुयात् ॥ स्पर्द्धामुद्धूय कमला वा
ग्देवी मंदरे मुखे ॥३३॥ पौत्रांतं स्थैर्यमास्थाय निवसत्येव निश्चितम् ॥ इदं
कवचमज्ञात्वा यो जपेत्कालिदक्षिणां ॥३४॥ शतलक्षं प्रजप्तापि तस्य
विद्या न सिद्ध्यति ॥ स शस्त्रघातमाप्नोति सोचिरान्मृत्युमाप्नुयात् ॥३५॥
जपेदादौ जपेदंते सप्तवाराण्यनुक्रमात् ॥ नोच्छस्य यत्र कुत्रापि गोपनी
यं प्रयत्नतः ॥३६॥ लिखित्वा स्वर्णपात्रे वै पूजाकाले तु साधकः ॥ मूर्ध्नि
धार्यं प्रयत्नेन विद्यारत्नं प्रपूजयेत् ॥३७॥ इति श्रीभैरवतंत्रे कालीक
ल्पे कालीकवचं समाप्तमगमत् ॥ श्रीमद्गुरुचरणाभ्यां न
मो नमो नमो नमो नमो नमो नमः ॥

रामः
४

इति

कालिकाकवचम्

समाप्तम्

लाघनावलाकाचमात्रामुद्रासितासिता॥२०॥एताःसर्वाःखड्गहस्तामु
ण्डमालाविभूषणाः॥रक्षन्तुत्वायुधैर्दिक्षुब्राह्मीनारायणीतथा॥२१॥माहे
श्वरीचचामुण्डाकौमारीचापराजिता॥वाराहीनारसिंहीचसर्वेऽप्यायुध
भूषणाः॥२२॥रक्षन्तुत्वायुधैर्दिक्षुमांविदिक्षुयथातथा॥इतितेकथितंदि
व्यंकवचंपरमाद्भुतम्॥२३॥श्रीजगन्मंगलंनाम
त्रैलोक्याकर्षणंब्रह्मकवचंमन्मुखोदितम्॥२४॥गुरुपूजांविधाया
थविधिवत्प्रपठेन्नरः॥कवचंत्रिःसकृद्वापियावज्ज्ञानंचवापुनः॥२५॥ए
तच्छतार्द्धमावृत्यत्रैलोक्यविजयीभवेत्॥त्रैलोक्यंक्षोभयत्येवकवच

अथ

"मातृकापूजनम्"

137
12(F)

श्रीगणेशाय नमः ॥ अथ मातृकापूजनं ॥ तत्रादौ अविघ्नपूजनमाह ॥ गोधूमादिधान्यपुंजोपरि ताम्र-
मा० त० यपात्रे अविघ्नाख्यं वक्रतुंडविनायकाकां प्रतिमां कुंकुमादिना लिखित्वा पंचकेसरवारुणोपरि पूजयेत् ॥ अवि-
॥१॥ घ्नं मंडपो गौर्यो ग्ना स्वाहा द्वारमातरः ॥ वसोर्धारा शाकंसंख्या होतु देव्यो पंचनांदिकाः ॥१॥ मोदश्च
च प्रमोदश्च सुमुखो दुर्मुखस्तथा ॥ अविघ्नो विघ्नकर्ता च षडेते विघ्नमातरः ॥ २॥ ॐ भूर्भुवःस्वः
मोदाय नमः ॥ मोदं आवाहयामि ॥ १ ॐ प्रमोदाय नमः प्रमोदं आ० ॥ २ ॐ भू० सुमुखाय नमः सुमु-
खं आ० ३ ॥ ॐ भू० दुर्मुखाय नमः ॥ दुर्मुखं आवाह० ४ ॥ ॐ भू० अविघ्नाय नमः अविघ्नं आ० ५ ॥
ॐ भू० विघ्नकर्त्रे नमः ॥ विघ्नकर्तारं आ० ६ ॥ मनोजूतिरिति प्रतिष्ठा ॥ मनोजूतिर्जुषतामाज्य-
स्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञं समिमं दधातु ॥ विश्वेदेवास इह मादयंतामों प्रति-
ष्ठ ॥ एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजंते सर्वमेव प्रतिष्ठितं भवति ॥ मोदादिषड्विना-
यकाः सुप्रतिष्ठिता वरदा भवंतु ॥ आवाहनादि पुष्पांजल्यंतं पूजनं कार्यं ॥ एतान्मंत्रा० मोद-
दादिषड्विनायकाः प्रियंतां न मम ॥ इत्यविघ्नमातरः ॥ आचार्यहस्ते सुपूजितं अस्तु ॥ अत्राः ॥
पांतु स्थितिभवंतो वदंतु ॥ अत्राः पांतु ॥ धान्यं पांतु ॥ अक्षताः पांतु पुष्पा० तांबूलां० दक्षिणां०
अपूपा पांतु बहुलं च पापहर्ता तिलवंतो वदंतु ॥ ग्रासा दूर्वा पांतु ॥ ग्रासा पल्लवानां वृद्धि ॥
ततो आचार्येण दुर्वादीन्यादाय प्रशस्तवर्णयुक्ताः रक्तसूत्रे पंचधा वेष्टनं कार्यं ॥
तेषां मंडपमातृसंज्ञा ॥ तासां मंडपमातृणां एकस्मिन्पात्रे स्थापनं ॥ वसोः पवित्रेणायजन् ॥१॥

मानपत्न्या स्थानं तैलारोपणं कार्यं ॥ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि वसोः पवि-
त्रमसि सहस्रधारम् ॥ देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥
हरिद्राकुंकुमादिसुगंधचूर्णेन उद्वर्तनं ॥ अहिरिव भोगैरिति मंत्रेण ॥ अहिरिव भोगैः प-
र्येति बाहुं ज्याया हेतिं परिबाधमानः ॥ हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं प-
रिपातु विश्वतः ॥ निकामे निकामे नितु स्नोदकेन स्नानं ॥ निकामे निकामे नः पर्जन्यो
वर्षतु फलवत्यो न ओषधयः पच्यंतां योगक्षेमो नः ॥ कल्पतां ॥ दधिक्राव्णो इति दधिलिप्ता पि०५
वेदनं ॥ ॐ दधिक्राव्णो ॥ ॐ घार्म वधिरिति घृतस्नानं ॥ घार्म वधी ॥ मंडपस्तंभेषु
मोक्षी रोमवद्भिः स्थिरीकरणं ॥ स्थिरो भव वीड्वंग आशुर्भव वाज्यर्वन् ॥ पृथुर्भव सु-
षदस्त्वमग्नेः पुरीषवाहणः ॥ एवं नैर्ऋत्यां वायव्यां ईशान्यां स्तंभेषु ॥ पुनः मंत्रेण य-
स्मिन्वृक्षे सुपलाशे पंचदशास्तंभे पिहिता ॥ कांडात्कांडात् इति मंत्रेण कंपनं ॥ कां-
डात्कांडा० पूर्वमंत्रेण मंडपमध्ये स्तंभे ॥ पश्चिमे स्थापनं ॥ तासां आवाहनादि पूजनं कार्यं
नंदिनी नलिनी मैत्रा उमा च पशुवर्धिनी मंडपस्थापयेत्स्तंभे सर्वे प्रकीर्तिताः ॥
अग्नेयमंडपस्तंभे ॥ ॐ भूर्भुवःस्वः नंदिन्यै नमः ॥ नंदिनीमावाहयामि ॥ नैर्ऋत्यकोणमंडप-
स्तंभे ॐ भू० नलिन्यै नमः नलिनीमावा० ॥ वायव्यकोणमंडपस्तंभे मैत्रायै नमः ॥ मैत्रायै
नमः मैत्रीमावा० ३ ईशान्यमंडपस्तंभे ॥ उमायै नमः० उमां आ० ४ मंडपस्तंभे पशुवर्धिन्यै नमः ॥ पशु

मा०ल० वृद्धिनीकां० प्रतिष्ठादिमेत्रपुष्पाञ्जली पर्यन्तेपूजनं कार्यं॥अनयापद्धत्यादिनेदित्यादिमंत्रप्रमा
११२११ तेनः प्रीयन्तांनमम॥अथमरुपदजनेशिष्टाचारएवशरणं॥यत्रमरुपानाङ्कितत्राविद्यमरु
पमातृणांस्थलजलद्वारमातृणांचाभावः॥ततोगौर्यादिमातृणांस्थापनं॥रक्तवस्त्रांस्वतपीठे
मातृणांदक्षिणेपांक्रमाणांमुद्रकपर्वगौर्यांप्रस्तुपक्रमाणां प्रांगपवर्गाणांचास्थापनं॥॥
तद्यथा॥गौरीपद्माशचीमेधासावित्रीविजयाजया॥देवसेनास्वधास्वाहामातरोलोकमातरः
धृतिपुष्टिस्तथातुष्टिरात्मनः कुलदेवता॥गणेशेनाधिकाह्येता वृद्धौपूज्याश्चषोडश॥ॐभू
र्भुवःस्वः गणपतयेनमः॥गणपतिमावाहयामिस्थापयामि॥ॐभू० गौर्यैनमः॥गौरीमा०॥२
ॐभू० पद्मायैनमः पद्मामा०॥ॐशच्यैनमः॥शचीमा०॥ॐभू०मेधायैनमः॥मेधामा०ॐभू०
सावित्र्यैनमः॥सावित्रीमा०ॐभू०विजयायैनमः विजयामा०ॐभू०जयायैनमः जयामा०ॐभू०
देवसेनायैनमः देवसेनामा०ॐभू०स्वधायैनमः स्वधामा०ॐभू०स्वाहायैनमः स्वाहामा०ॐभू०
धृत्यैनमः॥धृतीमा०ॐभू०पुष्ट्यैनमः पुष्टीमा०ॐभू०तुष्ट्यैनमः तुष्टीमावा०ॐभू०आत्मनः कुल
देवतायैनमः॥आत्मनः कुलदेवतामा०॥आवाहनादिषोडशोपचारैः प्रत्येकं पदार्थान्समर्पयेन
कोजनुसमर्पयेनवापूजयेत॥समस्तेदिति मंत्रपुष्पं॥ॐ समस्तदेव्यादिधायासंदक्षिणायोरूप
सामामः॥आयः प्रमोधीमोदिमहतववीरुवेदयतवदेविशक्ति॥१॥ततोजलमातरः॥
प्रभृतजलपूरितमृत्तिकपात्रेलिखितप्र[illegible]जिमासुजलमातरः पूजनं तद्यथा॥मत्सीकूर्मीचवारा
हीमण्डूकीकुर्कुटीदुर्दुरीतथा॥जलूकीसोमपाश्चैवसर्वेताजलमातरः॥ॐभू०मत्स्यैनमः मत्स्यैमा० ११२११

ॐभू०कूर्म्यैनमः कूर्मीमा०ॐभू०वाराह्यैनमः॥वाराहीमावा०॥ॐभू०मण्डूक्यैनमः॥मण्डूकीमा०
ॐभू०मकर्यैनमः मकरीमा०ॐभू०महाक्यैनमः महाकीमा०॥ॐभू०कौचीक्यैनमः कौचि
कीमावाहयामि॥आवाहनादिषोडशोपचारैः पूजनं कार्यं॥ततोस्थलमातरः॥तद्यथा ॐ
भू०॥ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथावाराहीचतथेन्द्राणीचामुण्डासप्तमातरः
ॐभू०ब्राह्म्यैनमः ब्राह्मीमावाह०ॐभू०माहेश्वर्यैनमः माहेश्वरीमा०ॐभू०कौमार्यैनमः
कौमारीमा०ॐभू०वैष्णव्यैनमः वैष्णवीमा०ॐभू०वाराह्यैनमः॥वाराहीमावाह०ॐभू०इन्द्राण्यै
नमः इन्द्राणीमा०ॐभू०चामुण्डायैनमः चामुण्डामा०७॥इतिस्थलमातृकाः॥अथद्वारमातृणां
देवतागारेलिखितप्रतिमासुपूजनंकार्यं॥अथद्वारमातरः॥गृहद्वारस्यदक्षिणभागेलिख
स्थितप्रतिमासुपूजनं॥ॐजयन्तीमंगलानामशोभनाचपिंगलानन्दकालिप्रपूज्यातेपंचे
ताद्वारमातरः॥ॐभू०जयन्त्यैनमः जयन्तीमा०ॐभू०मंगलायैनमः॥मंगलामा०ॐभू०पिंगला
यैनमः पिंगलामा०ॐभू०ततः वामभागे॥ॐभू०आनन्दवर्द्धन्यैनमः आनन्दवर्द्धनीमावा०॥
ॐभू०महाकाल्यैनमः॥महाकालीमा०॥इतिद्वारमातरः॥अथघृतमातरः॥गृहमध्ये
लिखितप्रतिमासुस्थाप्य॥कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः॥बुद्धिर्लज्जा
वपुःशान्तिस्तुष्टिःकान्तिश्चमातरः॥श्रीश्चलक्ष्मीर्धृतिर्मेधास्वाहाप्रज्ञासरस्वती॥मांगल्ये
षुप्रपूज्यन्तेसप्तैताघृतमातरः॥ॐभू०श्रियैनमः श्रियंमा०ॐभू०लक्ष्म्यैनमः लक्ष्मीं

ग्र० ॐ भूः धृत्यै नमः धृतीमा० ॐ भूः मेधायै नमः मेधां० ॐ भूः पुष्ट्यै नमः पुष्टीमा० ॐ भूः
श्रद्धायै नमः श्रद्धामा० ॐ भूः क्रियायै नमः क्रियामा० ॐ भूः मत्यै नमः मतीमा० ॐ भूः
बुद्ध्यै नमः बुद्धिमा० ॐ भूः लज्जायै वपुषे नमः लज्जावपुः मा० ॐ भूः शान्त्यै नमः शा
न्तीमा० ॐ भूः तुष्ट्यै नमः तुष्टीमा० ॐ भूः कान्त्यै नमः कान्तीमा० १२ ।। इति ग
हमातरः अथ घृतमातरः ।। वसोः पवित्रमसि शतधारसि म सादि स्र ह्ये स्पतेन
मंत्रेण कस्मिंश्चित्पात्रे स्थितेन सगुडेन घृतेन कुंकुमलक्तादि एणाद्युते राधवर्गः प्र
क्षिप्य मादि प्रागग्रं वर्णवानां निलोचोर्ध्व ताः पंच सप्त वा वसोर्धाराः ।। कृत्वा ।। स
गुडेन घृतेन च सो धाराः कार्याः सहिस्तंतो मदरत्वेदं वसोर्धाराः ॐ कामधुक्षद्दू लेता
वतामेव एणशिरोधार प्रासनो र्द्धभागे गुडघृतेन की करणं प्रतिधारं नामे एणश्रि
यादिदेवता आवाहयेत ।। श्री लक्ष्मी धृति मेधा स्वाहा प्रज्ञा सरस्वती ।। मांगल्ये
षु प्रपूज्यंते सप्तैता घृतमातरः ।। तद्यथा ।। ॐ भूः० श्रियै नमः श्रीयमा० ॐ भूः लक्ष्म्यै
नमः लक्ष्मीमा० ॐ भूः धृत्यै नमः धृतिमावाहा० ॐ भूः० मेधायै नमः मेधामा० ॐ भूः
ॐ पुष्ट्यै नमः पुष्टीमा० ॐ भूः० श्रद्धायै नमः श्रद्धामा० ॐ भूः० सरस्वत्यै नमः सरस्व ।।३।।

तीमा० ७ ।। पंचधारा वा षड्धारा वा सप्तसहस्रकौ सेविता यत्र न्यासं दत्तं ।। इति वसोर्धा
रा देवता ।। दक्षिणा त्यास्तु ॥ अत्र उपमातृकास्थापनं ।। सुवर्णस्त्रिते अपि कुर्वंति ।। त
स्मिन्नेव कुड्यप्रदेशे वा कांश्री कुंकुमादिना लिखित प्रतिमासु गोमादि गृह मातृकां
तानां पूजनं कुर्वंति ।। अत्रास्ति कुलाचार एव शरणं ।। ततः आयुष्यमंत्रजपः ।। ॐ आ
युष्यं वर्चस्यं रायस्पोषमौद्भिदं ।। इदं हिरण्यं वर्चस्वज्जैत्रायाविशतादु मां
।। ततः ॐ यदाबध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ।। तन्म
आबध्नामि शतशारदायायुष्मान् जरदष्टिर्यथासम् ।। इत्यायुष्यमंत्रजपः ।। इति मा
तृकापूजनं समाप्तं ।। अनेन कर्मणा श्रीगणनाथः प्रीयतां न मम ।। न तद्रक्षांसि न पि
शाचास्तरंति देवानामोजः प्रथमजं ह्येतत् ।। यो बिभर्ति दाक्षायणं हिरण्य
ं स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ।। ३ ।।

।। इति मातृकापूजनं ।।

मा०त०

॥४॥

इति

मातृकापूजनम् ।

137/12 (7)

137/12 (7)

॥४॥

अथ

॥ मालामन्त्रविधानम् ॥

॥ श्रीगणेशाय नमः ॥ ॐ नमो ॐ ऐं श्रीं ह्रीं भुं शक्तिमालामंत्रस्य उपस्थेन्द्रियाधिष्ठा
यी वरुणादित्य ऋषिः गायत्री छन्दः सात्विक ककार भट्टारक पीठस्थित कामेश्वरांक
निलय कामेश्वरी भट्टारिका देवता खड्गसिद्धौ विनियोगः ॥ तादृशं खड्गमाप्नोति येन हं
तो धृतेन वै ॥ अष्टादश महाद्वीपे साम्राड् भोक्ता भविष्यति ॥ १ ॥ नमो तत्र शक्तिमाला
मंत्रस्य प्राणेन्द्रियाधिष्ठायी मित्रादित्य ऋषिः उष्णिक् छन्दः सात्विक एकवीर महाभट्टा
रक पीठस्थित एकवीर कामेश्वरांकनिलय एकला नाम भट्टारिका देवता पादुकासिद्ध्य महा ६
र्थे विनियोगः ॥ तादृशं पादुकायुग्मं प्राप्नोति तव भक्तितः ॥ पादारम्भणमात्रेण त्रै
लोक्य भ्रमणं भवेत् ॥ २ ॥ स्वाहान्त शक्तिमाला मंत्रस्य पादेन्द्रियाधिष्ठायी धात्रादित्य
ऋषिः अनुष्टुप् छन्दः ईकार भट्टारक पीठस्थित ईश्वर रस्य ईश्वा नाम कामेश्वरांकनि
लय ईश्वरी नाम भट्टारिका देवता अंजनसिद्ध्यर्थे विनियोगः ॥ सिद्धांजनेन समासाद्य
तेनांजित विलोचनः ॥ निधिं पश्यति सर्वत्र भक्तैस्तेन समन्वितान् ॥ ३ ॥ तर्पणं तत्र शक्ति

मालामंत्रस्य पाणीन्द्रियाधिष्ठायी अर्यमादित्य ऋषिः बृहती छन्दः सात्विक लकार भट्टा
रक पीठस्थित ललिताक्षर सार कामेश्वरांकनिलय ललिता भट्टारिका देवता बिलसि
द्ध्यर्थे जपे विनियोगः ॥ बिलद्वारे महाप्राप्य पाताले तलयोगिनः ॥ दृष्ट्वा ततः प्राप्तसि
द्धिस्तव भक्तो भविष्यति ॥ ४ ॥ जमां तत्र शक्तिमाला मंत्रस्य वागिन्द्रियाधिष्ठायी त्व
ष्ट्रादित्य ऋषिः पंक्तिश्छन्दः सात्विक ह्रींकार भट्टारक पीठस्थित हृच्छय नाम कामेश्व
रांकनिलय हृल्लेखा नाम भट्टारिका देवता वाक्सिद्धौ विनियोगः ॥ वाक्सिद्धिर्वि
धा प्रोक्ता शापानुग्रहरूपिका ॥ महाकवित्वरूपा च भक्तस्ते तव यास्यदः ॥ ५ ॥ शुद्धशि
व मालामन्त्रस्य घ्राणेन्द्रियाधिष्ठायी भगादित्य ऋषिः त्रिष्टुप् छन्दः सौः सात्विक हक
र [illegible]क पीठस्थित हल्लिनी ललिता भविता क्लीं हल्लीं कामेश्वर भट्टारिको देवता देह
सिद्ध्यर्थे विनियोगः ॥ तथा सिध्यति ते भक्तः शरीरं येन पार्थिवति ॥ शुद्धकाञ्चनवत्तस्य
कदाचित्क्वापि न क्षयः ॥ ६ ॥ नमो न्तः शिवमालामंत्रस्य जिह्वेन्द्रियाधिष्ठायी इन्द्रादित्य

ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुन्दरि हृदयदेवि श्रीचक्रनगरसम्राज्ञि नमस्ते नामरु स्वाहा ॐ श्रीं ह्रीं ऐं ॥

महार २ ज ऋषितां १

२ ऋषिः जगती छन्दः [illegible]ह्रौं स सकार भट्टारक पीठ स्थित सरस्वती नाम ललितां कः सर्वज्ञना
म कामेश्वर भट्टारको देवता लोह सिद्धौ विनियोगः ॥ वेद्ध कह स्तस्पर्शेन लोह मष्टविधं
वै ॥ काञ्चनी भाव माप्नोति येन स्याच्छिव तुल्यता ॥ ७ ॥ स्वाहान्त शिवमाला मन्त्रस्य चास्तु
त्रिक्रियाधिष्ठायी विवस्वानादित्य ऋषिः अति जगती छन्दः तामस ककार पीठ स्थित क महारक ४
मला नाम ललिता ऋषितां कः कालान्त नाम कामेश्वर भट्टारको देवता अणिमासिद्धये वि यद ५
नियोगः ॥ [illegible]गुल्व महत्वाद्याः स्वेच्छामात्रेण कल्पिताः ॥ तव भक्त शरीराणामणि
माद्यागुणाः स्मृताः ॥ ८ ॥ तर्प्पणान्त शिवमाला मन्त्रस्य त्वङ्ग क्रियाधिष्ठायी पूषादित्य
महारक ४ ऋषिः शाक्करी छन्दः ओ[illegible] दह कार पीठ स्थित हरवल्लभा रम्य ललिता ऋषितां कोह
नाम कामेश्वर रनाथ भट्टारको देवता सर्ववश्य सिद्धौ विनियोगः ॥ शरीरमर्थं प्राणं च निवेद्य निज भक्त
महा २ वत् ॥ तव भक्तं निषेवं ते वशीभवतां न पादयः ॥ ९ ॥ जयान्त शिवमाला मन्त्रस्य श्रोत्रेक्रि
याधिष्ठायी सवितादित्य ऋषिः अति शाक्करी छन्दः तामस लकार भट्टारक पीठ स्थित २

अथ

मालामन्त्रविधानम् 1?

१२

३ स्वकार्ये विहितात्मनः ॥ ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुन्दर्यै नमः ऐं ३ ॐ नमस्त्रिपुरसुन्दराय
नमः हृदयदेव्यै नमः हृदयदेवाय नमः स्वामिनि श्रीचक्रनगरसाम्राज्ञै नमः सम्राजे नमः ॥
नमस्ते ३ स्वाहा इत्येतैः ॥ अथ ॥ स्वाहान्तमिथुनमालामंत्रस्य मनस्तत्त्वे क्रियाधिष्ठायी ब्रह्म
रूपप्रातरादित्य ऋषिः धृति छन्दः तामस ककार महारकपीठस्थित कामकोटि ना
म ललिताम्हषितांकः करुणाकर नाम कामेश्वर महाभट्टारको देवता सर्वपुरुषार्थ
सिद्धौ विनियोगः ॥ धर्मश्चार्थश्च कामश्च त्रिवर्गो यैः शरीरिणां ॥ अभ्यासेन सिद्धः
स्यान्नवभक्तस्य शोभने ॥१३॥ ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुन्दर्यै स्वाहा ॥ ऐं ३ ॐ नमः
त्रिपुरसुन्दराय स्वाहा हृदयदेव्यै स्वाहा हृदयदेवाय स्वाहा श्रीचक्रनगरसाम्राज्ञै स्वा
हा श्रीचक्रनगरसम्राजे स्वाहा ॥ श्रीं ह्रीं ऐं ॐ ॥१३॥ अस्य मिथुनतर्पणमाल
मंत्रस्य प्रकृतितत्त्वे क्रियाधिष्ठायी नारायणरूप मध्याह्नादित्य ऋषिः अतिधृति छं
दः ओंकार महारकपीठस्थित लीलावती नाम ललिताम्हषितांकल्लावण्य नाम ३

को कामेश्वर महाभट्टारको देवता सुसर्वसुखभोगसर्वानंदसिद्धौ विनियोगः ॥ अलौकिकं
लौकिकं च द्विविधं सुखमंडलं ॥ न दुर्लभं परशिवे त्वत्पदांभोजसंगिनां ॥१४॥ ऐं ३ ॐ न
मस्त्रिपुरसुंदरीं तर्पयामि ऐं ३ ॐ नमस्त्रिपुरसुंदरं तर्पयामि हृदयदेवीं तं० हृदयदेवं तं० ॥
श्रीचक्रनगरसाम्राज्ञीं तर्पयामि श्रीचक्रनगरसम्राजं तर्पयामि श्रीं ह्रीं ऐं ॐ स्वाहा ॥ नमस्ते ३४
॥१४॥ अस्य मिथुनजयमालामंत्रस्य पुरुषतत्त्वे क्रियाधिष्ठायी महेश्वररूप सायमा
दित्य ऋषिः प्रकृतिच्छन्दः मोक्षद ह्रींकार महारपीठस्थित हारेश्वरी नाम ललिताम्हवि
ताङ्कहिरण्यबाहु नाम कामेश्वर महाभट्टारको देवता मोक्षसिद्धौ विनियोगः ॥ या देवता
भोगकरी सा न मोक्षाय कल्प्यते ॥ मोक्षदा न हि भोगाय ललिता तद्द्वयप्रदा ॥१५॥ त्वं हि
ललिता मैत्रिपुराणां भोगमोक्षैककारणं ॥ ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुंदरि जय जय
ऐं ३ ॐ नमस्त्रिपुरसुंदर जं० हृदयदेवि जं० हृदयदेव जं० श्रीचक्रनगरसाम्राज्ञि जं० श्री
चं० साम्राड्जय जं० नमस्ते ३ स्वाहा श्रीं ह्रीं ऐं ॐ स्वाहा ॥ इति मिथुनजयमाला ॥१५॥

४ अस्य श्रीसुवर्णकुसुमांजलिमालामंत्रस्य सकलेन्द्रियाधिष्ठायी दक्षिणामूर्तिरूप चिद
नंदादित्य ऋषिः गायत्र्यादिनानाछन्दांसि सात्विक राजस तामस भोग मोक्षदक्का
रादिपंचदशाम महाभट्टारकपीठस्थित कामेश्वर्यादिरूप श्रीराजराजेश्वरी देवताख
ण्डादिमोक्षांतपंचदशासिद्ध्यो विनियोगः ।। तडिल्लेखा तन्वीं तपनशशिवैश्वानरमयीं
निषण्णां षण्णामप्युपरि कमलानां तव कलां ।। महापद्माटव्यां मृदितमलमायेन मनसा
महांतः पश्यंतो दधति परमाह्लादलहरीम् ।। ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुंदरि हृदय
देवि श्रीचक्रनगरसाम्राज्ञि नमस्तेऽस्तु स्वाहा ॐ श्रीं ह्रीं ऐं इति पुष्पांजलिमाला ।।
मंत्री मंत्रैरमीभिस्तु मंत्रितांभः पिबेत्सदा ।। क्षिप्तामृताभिभूतां मर्द्धिभूत विनाशिनी ।
।।१।। ज्वरिणां तु ज्वराभावस्तथाबाति किनामभिः ।। असाध्यरोगग्रस्तानां रोगशांतिर्य्योत्तिहि
संक्षयम् ।।२।। एतन्मंत्रिततोयेन भस्मानावा समुक्षणात् ।। पठित्वा हस्तसंस्पर्शान्मं
त्रकार्या विचारणा ।।३।। सप्ताष्टमालासंख्याभिर्मंत्रयित्वा यदोदकं ।। सप्ताहं सेवनं ४

ह२ नाम१ महा१ दि३

लक्ष्मीनाम ललिताऋषितां कोलल्लड्डि ह्रीं कामेश्वरभट्टारको देवता सर्वाकर्षणो विनियो
गः ।। लोकैं प्राकारसंगुप्तो निगडैन सुयंत्रिताः ।। त्वद्भक्तैः रुप्यमाणाश्च योषितः संपतंतिहि
।।१०।। अथ मिथुनभ्रुद्धमालामंत्रस्य अहंकारेन्द्रियाधिष्ठायी त्वष्टा ऋषिः सात्विक अनुष्टुप् छंदः
ह्रींकारमहापीठस्थित हिरण्यानाम ललिता ऋषितां कृहृदयेश्वरनाम कामेश्वरमहा
भट्टारको देवता सर्वसंमोहनसिद्धो विनियोगः ।। स्फुरं त्रिके तव भक्तो नाम वलोकनमा
त्रतः ।। किं कर्त्तव्यविमूढाः स्युर्नरनारी नृपादयः ।।११।। ॐ नमस्त्रिपुरसुंदरि त्रिपुरसुंद
रिहृदयदेवि हृदयदेवशिरो देवि शिरोदेवश्रीचक्रनगरसाम्राज्ञि श्रीचक्रनगरसाम्राज्ञि
नमस्तेऽस्तु स्वाहा ।। ॐ श्रीं ह्रीं ऐं ।।१२।। अथ पनमोत्तमिथुनमालामंत्रस्य बुद्धीन्द्रियाधि
ष्ठायी विष्ण्वादित्य ऋषि अस्य षि छंदः राजससकारभट्टारकपीठस्थित सकलजनि
नीनाम ललिता ऋषितां कः सर्वेश्वरनाम कामेश्वरमहाभट्टारको देवता सर्वस्तंभन
सिद्धो विनियोगः ।। तव भक्तैः प्रभावेन शरीरेन्द्रिय चेतसाम् ।। साध्यस्य स्तंभये कार्यं

परि१

कुर्य्याद्वन्ध्यापुत्रवतीभवेत्॥ इतिँशिखिदेक्रमालामंत्रविधानंसमाप्तिमगमत्॥ इतिश्री
सिंहसिद्धांतेसप्ताष्टमालाविधानंपरिकीर्त्तितं॥ श्रीमहात्रिपुरसुंदरीप्रीयताम्॥ श्रीः॥

137
12 (ष)